Digitization by eGangotri-South Center

कविरसायनमित्यपरनामा

तिङन्तकोषः

द्वितीय भाग

पाणिनीयधातुपाठस्यौपदेशिकधातूनां लृट्, लृङ्, लुट्, लिट्, आशीर्लिङ्, लुङ् इत्येते आर्धधातुकलकाराः

पुष्पा दीक्षिता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थमधिकृत्य किञ्चित्

अनन्तो वर्तते शब्दराशिर्लौकिको वैदिकश्च । तस्य प्रतिपत्तौ प्रतिपदपाठमनभ्युपायं मत्वा भगवता पाणिनिना यत्सामान्य- विशेषवल्लक्षणं कृतं तदेवाष्टाध्यायी। अत्र सर्वः शब्दराशिर्भगवता भागद्वये विभाजितः। अजन्तशब्दा, हलन्तशब्दाश्च। अजन्तानां कृतेऽन्त्यमचमाश्रित्य कार्याणि प्रोक्तानि । हलन्तानाञ्च कृत उपधामाश्रित्य। अयमेव सर्वेषां लौकिकानां, वैदिकानाञ्च शब्दानां सिद्धौ लघुतमोपायः। इममेव क्रममनुसृत्य मयापि धातवस्त्रयो- दशसु वर्गेषु विभज्याष्टाध्याय्याः सूत्रैः संयोजिताः । अनेनैकस्मिन् सिद्धे सर्वं सिध्यति । प्रक्रियाग्रन्थेषु पाणिनीयक्रममनादृत्यैकैकस्य धातोर्दश दश लकाराः साध्यन्ते, तेनैव प्रक्रियाग्रन्था जटिला सञ्जाताः, कोषग्रन्थाश्च बृहदाकाराः । अत्रैकस्मिन् प्रयोगे कृतभूरिप्रयत्नस्यापि कदापि न हीयते विचिकित्सा। भगवतः पाणिनेर्महत्तमेन तपसा निर्धारितक्रमावज्ञानेनैव द्वादशभिर्वर्षै-रधीयते व्याकरणम्। अष्टाध्याय्याः प्रकरणानुसारेण सर्वेषां धातूनामेकैकस्य लकारस्य, एकैकस्य वा प्रत्ययस्य सिद्धिरयमेव पाणिनीयः क्रमः। अनेन पाणिनीयक्रमेणाधीयते चेत् सर्वा खलु प्रक्रिया मासद्वयेन मासत्रयेण वा सिध्यत्येव । नास्त्यत्र संशीतिलेशोऽपि। इममेव क्रममाश्रित्य मया इमे कोषा विरचिताः-

1. तिङन्तकोषः - प्रथमो भागः (सार्वधातुकखण्डः)
2. तिङन्तकोषः - द्वितीयो भागः (आर्धधातुकखण्डः)
3. कृदन्तकोषः - प्रथमो भागः (औपदेशिकधातूनां कृदन्ताः)
4. कृदन्तकोषः - द्वितीयो भागः (आतिदेशिकधातूनां कृदन्ताः)

अत्र कृदन्तानां, तिङन्ताद्ध रूपविज्ञानेन सह प्रक्रियाविज्ञानमपि जायत, इत्याश्चर्यमष्टाध्याय्या इति शम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कविरसायनमित्यपरनामा

तिङन्तकोषः

द्वितीयो भागः

(पाणिनीयधातुपाठस्यौपदेशिकधातूनां लृट्, लृङ्, लुट्,
लिट्, आशीर्लिङ्, लुङ्, इत्येत आर्धधातुकलकाराः)

प्रणेत्री

पुष्पा दीक्षिता

PRATIBHA

प्रतिभा प्रकाशन

दिल्ली भारत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथम संस्करण 2014

ISBN : 978-81-7702-290-2 (सेट)
978-81-7702-292-6 (द्वितीय भाग)

© पुष्पा दीक्षिता:

मूल्य : 4500/- (सेट 3 भागों में)

प्रकाशक
डॉ० राधेश्याम शुक्ल
एम.ए., एम. फ़िल., पी-एच.डी.
प्रतिभा प्रकाशन
(प्राच्यविद्या-प्रकाशक एवं पुस्तक-विक्रेता)
7259/23, अजेन्द्र मार्केट, प्रेमनगर
शक्तिनगर, दिल्ली-110007
दूरभाष : (O) 011-47084852, 09350884277
e-mail : pratibhabooks@ymail.com

टाईप सेटिंग : एस० के० ग्राफिक्स
दिल्ली-84

मुद्रक : एस० के० ऑफसेट, दिल्ली

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

Kavirasāyanam

or

TINANTA KOṢAḤ

Volume - II

By

Pushpa Dikshita

PRATIBHA

PRATIBHA PRAKASHAN

DELHI-110007

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

First Edition : 2014

© Pushpa Dikshita

ISBN : 978-81-7702-290-2 (Set)
978-81-7702-292-6 (Vol. II)

Rs. 4500/- (Set of 3 Vols.)

Published by :
Dr. Radhey Shyam Shukla
M.A., Ph.D.
PRATIBHA PRAKASHAN
(Oriental Publishers & Booksellers)
7259/23. Ajendra Market, Prem Nagar,
Shakti Nagar, Delhi-110007
Ph. : (O) 47084852, 09350884227
e-mail : pratibhabooks@ymail.com

Laser Type Setting :
S.K. Graphics, Delhi

Printed at : **S.K. Offset, Delhi**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाणिन्यभिमतम्

दीक्षितपुष्पा

अनन्तो वर्तते शब्दराशिर्लौकिको, वैदिकश्च। तस्य प्रतिपत्तौ प्रतिपदपाठमनभ्युपायं भगवता पाणिनिना दुश्चरतपसा निखिललौकिकवैदिकशब्दराशेः प्रत्यक्षमेककालावच्छेदेन ... प्रकृतिप्रत्ययादिविभागकल्पनापूर्वकमपूर्वमिदं सामान्यविशेषवल्लक्षणमष्टाध्यायीपद ...पदेश्यं कृतं, येन महतो महतः शब्दौघस्य प्रतिपत्तिरल्पीयसा कालेन जायते।

अत्र सर्वो लौकिको, वैदिकश्च शब्दराशिर्भगवता भागद्वये विभाजितः। अजन्ताः ...:, हलन्ताश्च। अजन्तानां कृतेऽन्त्यमचमाश्रित्य कार्याणि प्रोक्तानि। यथा – अतो गुणे। ...ा भिस ऐस्। अतोऽम्। अतो येयः। अतो लोपः। अतो हेः, इत्यादीन्यदन्तानां कृते। ...तोऽनुपसर्गे कः। आतश्चोपसर्गे। आतो युच्। आतो मनिन्-क्वनिब्-वनिपश्च। आतो ... इटि च। आतो युक् चिण्कृतोः, इत्येतानि सूत्राण्याकारान्तानां कृते। एरच्। ...रनेकाचोऽसंयोगपूर्वस्य, इतीकारान्तानां कृते। उतश्च प्रत्ययादसंयोगपूर्वात्। उतो ...द्धिर्लुकि हलि। ओर्गुणः। ओः सुपि। इत्यादीन्युकारान्तानां कृते। अचि श्नुधातुभ्रुवां ...ोरियङुवङौ, इतीकारान्तानामुकारान्तानां च कृते। घिसंज्ञामुद्दिश्यापि सर्वं ...ार्यमिकारान्तामुकारान्तानां च कृते। नदीसंज्ञामुद्दिश्य सर्वमीकारान्तानामूकारान्तानां च ...ते। ऋतो ङिसर्वनामस्थानयोः। ऋदृशोऽङि गुणः। ऋतश्छन्दसि। ऋतष्ठञ्। ऋतश्च ...ोगादेर्गुणः। ऋद्धनोः स्ये। ऋतश्च। ऋदुशनस्पुरुदंसोऽनेहसां च, इत्यादीनि ...ारान्तानां कृते। ॠत इद्धातोः। उदोष्ठ्यपूर्वस्य, इति ॠकारान्तानां कृते। ...ातुकार्धधातुकयोः इतीगन्तानां कृते। अचो ञ्णिति। अचो यत् इत्यादीन्यजन्तानां कृते।

किन्तु हलन्तशब्दानां कृते सामान्यं शास्त्रमन्त्यक्रमेण न प्रवर्तते। तच्च ...लन्तेषूपधाक्रमेण प्रवर्तते। यथा – पोरदुपधात्। अतो ल्रान्तस्य। अतो हलादेर्लघोः। अत ...ाः। अत एकहल्मध्येऽनादेशादेर्लिटि, इत्यादीनि सूत्राणि – अदुपधानां कृते सन्ति। रलो ...धाद्धलादेः संश्च, इति – इदुपधानाम्, उदुपधानां च कृते। उदुपधाद् ...ादिकर्मणोरन्यतरस्याम्, इत्युदुपधानां कृते। ऋदुपधाच्चाक्लृपिचृतेः। रीगृदुपधस्य च। उरृत्। अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्, इत्येतानि सूत्राणि – ऋदुपधानां कृते सन्ति। इगुपधज्ञाप्रीकिरः कः। पुगन्तलघूपधस्य च, इत्यादीनि सूत्राणि – इगुपधानां कृते। इदमेव पाणिनीयशास्त्रस्य सामान्यम्। अत्र यदेकस्य भवति तत्सर्वस्य भवत्यपवादान् वर्जयित्वा।

अत एवैकस्य रामशब्दस्य सिद्धौ सत्यां न वर्तत आवश्यकता कस्यचनान्यस्यादन्तशब्दस्य सिद्धेः। अयमेव सर्वेषां लौकिकानां, वैदिकानां च शब्दानां सिद्धौ लघिष्ठोपायः। अयमेव पाणिनीयक्रमः। अयमेव पाणिनेर्महता प्रयत्नेन सूत्रप्रणयनप्रकारः।

वस्तुतस्त्विदमेवास्ति पाणिनेः प्रक्रियाक्रमः सर्वत्र। धातुरूपसाधनायापि भगवतायमेव क्रम आश्रितः। किन्तु प्रक्रियाग्रन्थेषु लकाराणां लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, इत्यकारादिक्रम आश्रितः। अत्र लट्, इति अकारः। लिट्, इति इकारः। लुट्, इति उकारः। लृट् इति ऋकारः। लेट् इति एकारः। लोट् इति ओकारः। एवमेवाग्रेऽपि। अयं नास्ति प्रक्रियाक्रमः। अष्टाध्याय्यामप्यनेन क्रमेणैषां विधानं नास्ति, न च प्रक्रियासाधनम्।

धातूनामप्युक्तक्रममनादृत्य – भू, एध्, बाध् इति धातुपाठक्रमानुसारेणैवैकैकस्य धातोर्दश दश लकारा अकारादिक्रमेण साधिताः। धातुपाठे, तिङन्तप्रक्रियायाञ्च न कृतो विचारलेशोऽप्यस्य पाणिनेः प्रक्रियाविज्ञानस्य। अत एव तिङन्तप्रकरणं महाटवीवद् गहनं समजायत। प्रक्रियाग्रन्था जटिलाः सञ्जाताः, कोषग्रन्थाश्च बृहदाकाराः। अत्रैकस्मिन् प्रयोगे कृतभूरिप्रयत्नस्यापि कदापि न हीयते विचिकित्सा।

एकैकस्य धातोर्दश दश लकारा, इति त्वविधिरेव। अजन्तधातूनन्त्यक्रमेण, अथ च हलन्तधातू- नुपधाक्रमेण विभज्य, सर्वेषां धातूनामेकैकस्य लकारस्य, एकैकस्य वा प्रत्ययस्य सिद्धिरित्येव विधिः। पाणिन्यष्टाध्याय्याः प्रक्रियाविज्ञानमिदमिम्प्रथमतया मयैव प्रकाशितम्।

एकैकस्य प्रत्ययस्य कृते प्रकरणानि निबद्धानि सन्त्यष्टाध्याय्याम्। यथा – कास्प्रत्ययादाममन्त्रे लिटि। अत एकहल्मध्येऽनादेशादेर्लिटि। व्यथो लिटि। दयतेर्दिगि लिटि। गाङ् लिटि। लिटि धातोरनभ्यासस्य। लिट्यभ्यासस्योभयेषाम्, इत्यादीनि सूत्राणि, प्रकरणानि च लिट्-प्रत्ययकृत एव सन्ति। एवमेवान्येषां प्रत्ययानां कृतेऽपि सन्ति प्रकरणानि। अतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वेषां धातूनामेकैको लकारः, एकैकश्च प्रत्ययः साध्य, इत्येव पाणिनीयक्रमः, येनैकैकस्य वर्गस्यैकशब्दसाधनेन तत्सदृशः सर्वः शब्दराशिः स्वयमेव सिध्यति। अनेनैकस्मिन् प्रत्यये परत, एकस्य वर्गस्यैकस्य धातोः सिद्धिर्यथा भवति, तथैव तस्य वर्गस्यान्येषां धातूनामपि भवेत्, तस्मिन् प्रत्यये परतः। यथा - पा - पपौ, या - ययौ, ला - ललौ, वा - ववौ, मा - ममौ। पू - पुपाव, लू - लुलाव, नू - नुनाव। धू - दुधाव। अत्र नास्ति कश्चन भेदः। एवमेव - हृ - हरिष्यति-हर्ता, धृ - धरिष्यति-धर्ता, कृ - करिष्यति-कर्ता, भृ - भरिष्यति-भर्ता, मृ - मरिष्यति-मर्ता, स्मृ - स्मरिष्यति-स्मर्ता, सृ - सरिष्यति-सर्ता। एतानि समानाकाराणि रूपाणि दृष्ट्वैषां संरचनाविज्ञानमपि बुद्धौ झटिति स्फुरति। काव्यकृतां कृतेऽन्त्यानुप्रासा उपान्त्यानुप्रासाश्च अनेनानायासं सिध्यन्ति।

धातवो द्विविधाः -

१. औपदेशिकधातवः - पाणिनीयधातुपाठे पठिता धातवो धातुपाठ उपदिष्टत्वादौपदेशिकाः। एतेषां 'भूवादयो धातवः १.३.१' इत्यनेन धातुसंज्ञा भवति।

२. आतिदेशिकधातवः - सन्, क्यच् ,काम्यच्, क्यष्, क्यङ्, क्विप्, णिङ्, ईयङ्, णिच्, यक्, आय, यङ्, एते द्वादश सनादयः प्रत्ययाः सन्ति। एते सनादयोऽन्ते येषां ते सनाद्यन्ताः समुदायाः 'सनाद्यन्ता धातवः ३.१.३२' इत्यनेन सूत्रेण धातुसंज्ञका भवन्ति। इत्थञ्च धातवोऽनन्ताः।

एवं न भवति विश्वस्य कस्यामपि भाषायां, यदेकेन प्रत्ययेन योजितेन निखिलो वाक्यार्थो धातावेवान्तर्निविशेत्। इदमस्ति गीर्वाणवाण्या एव वैलक्षण्यं, यत् सनादिभिः प्रत्ययैर्नवीनो धातुरुत्पद्यते। तस्मात् पुनर्जायते तिङ्कृत्प्रत्ययैर्नूतना शब्दसृष्टिरित्यलौकिकमिव प्रतिभाति सर्वमिदम्।

धातुभ्यो विहिताः प्रत्यया अपि द्विविधाः -

एतेभ्यः सर्वेभ्यो धातुभ्यो विहिताः प्रत्यया द्विविधाः। सार्वधातुकसंज्ञका, आर्धधातुकसंज्ञकाश्च। लट्, लोट्, लङ्, विधिलिङ्, सिबभावे लेट्, एते पञ्च लकाराः सार्वधातुकसंज्ञकाः सन्ति। कृत्प्रत्ययेषु शतृ, शानच्, चानश्, शानन्, खश्, श, एश्, शध्यै, शध्यैन्, एते नव कृत्प्रत्ययाः सार्वधातुकसंज्ञकाः सन्ति। यदा धातुभ्य सार्वधातुकप्रत्यया विधीयन्ते, तदैव धातुप्रत्यययोर्मध्ये भवन्ति सार्वधातुकप्रत्ययनिमित्तका विकरणाः शबादयः।

लिट्, लुट् लृट्, सिपि लेट्, आशीर्लिङ्, लुङ्, लृङ्, एते सप्त लकारा आर्धधातुकसंज्ञकाः सन्ति। शिद्भिन्नाः सर्वे कृत्प्रत्ययाश्चार्धधातुकसंज्ञकाः सन्ति। यदा धातुभ्य आर्धधातुकप्रत्यया विधीयन्ते, तदा धातुप्रत्यययोर्मध्ये न भवन्त्येते सार्वधातुक-प्रत्ययनिमित्तका विकरणाः शबादयः। अयमेव पाणिनीयो विधिः। एकस्मिन् विभागे सार्वधातुकप्रत्ययाः। अपरस्मिन्नार्धधातुकप्रत्ययाः। उभयविधानां सम्मिश्रणं तु सर्वथाऽपाणिनीयमेव।

प्रत्ययानां द्वैविध्यान्मया पाणिनीयो धातुपाठोऽपि द्विरावर्तितः।

१. सार्वधातुकप्रत्ययोपयोगिधातुपाठः प्रथमः - लट्, लोट्, लङ्, विधिलिङ्, सिबभावे लेट्, इत्येतेषां पञ्चानां सार्वधातुकलकाराणां कृते, अथ च शतृ, शानच्, चानश्, शानन्, खश्, श, एश्, शध्यै, शध्यैन्, एतेषां नवानां सार्वधातुकसंज्ञककृत्प्रत्ययानां कृते दशसु गणेषु विभक्तो धातुपाठः प्रथमः।

अत्र पाणिनीयधातुपाठस्य सर्वे १९३० धातवः सन्ति। नैकोऽपि रिष्यति। ९९७ धातवो भ्वादिगणे, १४० दिवादिगणे, १५७ तुदादिगणे, ४१० चुरादिगणे, ३४ स्वादिगणे, १० तनादिगणे, ६१ क्र्यादिगणे, ७२ अदादिगणे, २४ जुहोत्यादिगणे, २५ रुधादिगणे च।

अथ च मयाङ्गस्यादन्तत्वमनदन्तत्वमनुसृत्य धातुगणानामपि क्रमः परिवर्तितः। भ्वादिः, दिवादिः, तुदादिः, चुरादिः, इति चतुर्णां गणानामेको वर्गः - अदन्तः। स्वादिः, तनादिः, क्र्यादिः, अदादिः, जुहोत्यादिः, रुधादिः, इति षण्णां गणानां द्वितीयो वर्ग - अनदन्तः।

वस्तुतस्तु सार्वधातुकप्रत्ययानां कृत एवेमे धातवो दशसु गणेषु विभक्ताः सन्ति। यतः सार्वधातुकेषु प्रत्ययेष्वेव परतो धातुभ्यो भवन्ति तत्तद्गणानां विकरणाः।

२. आर्धधातुकप्रत्ययोपयोगिधातुपाठो द्वितीयः - आर्धधातुप्रत्ययदृष्ट्या तु सर्वे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गणाः समाना एव। तत्कृते नास्त्येवायं दशसु गणेषु निबद्धो धातुपाठः। कस्यापि गणस्य भवेद् धातुः, तस्मादार्धधातुके प्रत्यये परतः कस्यापि गणस्य विकरणं न भवति। अतस्तत्र गणानामावश्यकतैव न भवति। अतः सार्वधातुकभिन्नानां लिट्, लुट् लृट्, सिपि लेट्, आशीर्लिङ्, लुङ्, लृङ्, एतेषां सप्तानां लकाराणां कृते, अथ च शिद्भिन्नानां सर्वेषां कृत्प्रत्ययानां कृते भ्वादितः क्र्यादिपर्यन्तानां नवगणानां धातून् समाहृत्य द्वितीयो धातुपाठः कृतः। अत्र चुरादयः पृथक् सन्ति। **अयञ्चात्र विशेषो, यन्महता प्रयत्नेनानयो- र्धातुपाठयोर्धातूनां क्रमः पाणिनीयप्रक्रियाविज्ञानानुसारेणेत्थं निर्धारितः ----**

धातवो द्विविधाः। अजन्ता हलन्ताश्च। अजन्तधातुषु सामान्यशास्त्र- मन्त्यमचमाश्रित्य प्रवर्तते, अतोऽजन्तधातूनां प्रक्रियादृष्ट्याष्टौ विभागाः कृताः।

१. आकारान्ताः - यथा - पा, ला, वा, दा, धा, इत्यादयः।
२. इकारान्ताः - यथा - जि, श्वि, चि, कि, रि, इत्यादयः।
३. ईकारान्ताः - यथा - नी, शी, डी, क्री, वी इत्यादयः।
४. उकारान्ताः - यथा - द्रु, दु, नु, कु, गु, क्षु, इत्यादयः।
५. ऊकारान्ताः - यथा - भू, लू, पू, नू, मू, इत्यादयः।
६. ऋकारान्ताः - यथा - हृ, भृ, धृ, मृ, कृ, स्वृ, स्मृ, इत्यादयः।
७. ॠकारान्ताः - यथा - जॄ, झॄ, शॄ, गॄ, वॄ, इत्यादयः।
८. एजन्ताः - यथा - ग्लै, म्लै, धे, ध्यै, पै, शो, छो, इत्यादयः।

किन्तु हलन्तधातुषु सामान्यशास्त्रमन्त्यं हलमाश्रित्य न प्रवर्तते, उपधामाश्रित्य प्रवर्तते। अतो हलन्तधातूनां प्रक्रियादृष्ट्या पञ्च विभागाः कृताः। ते चेत्थम् -

९. अदुपधाः - यथा - पठ्, चल्, वद् स्खल्, कक्, पच्, इत्यादयः।
१०. इदुपधाः - यथा - चित्, मिद्, छिद्, भिद्, मिल्, इत्यादयः।
११. उदुपधाः - यथा - बुध्, शुध्, मुद्, कुक्, उख्, इत्यादयः।
१२. ऋदुपधाः - यथा - कृष्, वृष्, नृत्, छृद् वृत्, वृध्, इत्यादयः।
१३. अवशिष्टाः - ये न सन्त्येषु वर्गेषु। मील्, शीक्, बुक्क्, इत्यादयः।

इदमेव पाणिनिशास्त्रस्य सामान्यम्। अत्र यत् कार्यमेकस्य धातोर्भवति तदेव भवति तस्य वर्गस्य सर्वेषां धातूनापवादान् वर्जयित्वा। अतोऽजन्तधातूनन्त्यक्रमेण, अथ च हलन्तधातूनुपधाक्रमेण विभज्य, सर्वेषां धातूनामेकैकस्य लकारस्य सिद्धिः क्रियेत, इत्येव पाणिनीयो विधिः। वर्णानुक्रमणीं विनाप्येते धातवो धातूनां स्वरूपविभागविज्ञानेनानेन कोषेऽन्वेष्टुं शक्यन्ते। किन्तु प्रक्रियाग्रन्थेषु भगवतः पाणिनेर्महत्तमेन तपसा निर्धारितमिमं क्रमं सर्वथावज्ञाय नवीनः कश्चन प्रक्रियाक्रमः परिकल्पितः, यस्यानुसरणेनैव द्वादशभिर्वर्षै- रधीयते व्याकरणम्। पाणिनीयक्रमेणानेनाधीयते चेत्, सर्वा खलु प्रक्रिया मासद्वयेन मासत्रयेण वा सिध्यत्येव। नास्त्यत्र संशीतिलेशोऽपि।

एतद्विज्ञानमाश्रित्यैव मया तिङन्तकोषः, कृदन्तकोषश्च विरचितः। तत्र तिङन्तकोषस्य त्रयो भागाः सन्ति -

१.तिङन्तकोषः

(प्रथमो भागः-पाणिनीयधातुपाठस्यौपदेशिकधातूनां सार्वधातुकलकाराः)

२. तिङन्तकोषः

(द्वितीयो भागः-१ पाणिनीयधातुपाठस्यौपदेशिकधातूनामार्धधातुकलकाराः)

३. तिङन्तकोषः

(द्वितीयो भागः-२ सनाद्यन्तानामातिदेशिकधातूनां दश लकाराः)

कृदन्तकोषस्य द्वौ भागौ कृतौ -

१. कृदन्तकोषः

(प्रथमो भागः-पाणिनीयधातुपाठस्यौपदेशिकधातूनां कृदन्ताः)

२. कृदन्तकोषः

(द्वितीयो भागः-सनाद्यन्तानामातिदेशिकधातूनां कृदन्ताः)

धातुरत्नाकरादिषु यत्कार्यं तिङन्तरूपाणां यत्कार्यं प्रायेण ४८०० पृष्ठेषु कृतं तदेव कार्यमत्र तिङन्तकोषे ९०० पृष्ठेषु कृतमित्याश्चर्यं पाणिनेः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भवानीशंकराविव मातापितरौ जानकीसुन्दरलालशुक्लौ प्रणम्य, गुरुचरणान् आचार्यविश्वनाथत्रिपाठिमहाभागान्, आचार्यबच्चूलालावस्थिमहाभागांश्च हृदि निधाय, अथ चाचार्यरामयत्नशुक्लमहाभागान्, आचार्यरामप्रसादत्रिपाठिमहाभागान् आचार्यरामकरण-शर्ममहाभागान् भूयो भूयोऽभिवन्द्य मदीयः संकल्पोऽयं पूर्णतामुपगतः।

महत्यस्मिन् कार्ये प्रतिपदं साहाय्यं कृतवती वैयाकरणतल्लजा डॉ. पाठकमनीषात्र सादरं स्मर्तव्या। अस्मिन् पाणिनीयमहायज्ञे कृतधियामस्य पूर्णतामेव चिन्तयतां मनीषिणां डॉ. रमाकान्तपाण्डेयः, डॉ. विष्णुकान्तपाण्डेयः, डॉ. ब्रजभूषण-ओझाः, डॉ. अभिजिद् दीक्षितश्चेत्येतेषां विदुषां वरीवृध्यतां यशः।

यस्याश्च हृद्यनिशं जागर्त्यष्टाध्यायी, साऽस्य ग्रन्थस्य पाठशोधनं महत्या सूक्ष्मेक्षिकया कृतवती, आचार्या-डॉ.-किरणवाजपेयी सर्वथा शुभाशिषमर्हति सद्विद्यासमृद्धये।

येषां वामाङ्गे निषद्य मयाहर्निशं सेव्यते भगवान् पाणिनिस्ते मान्या दीक्षितशिवप्रसादमहाभागा वन्द्याः।

स्वप्रकाशशब्दब्रह्मरूपा वाचामधिष्ठात्री भारती, यदीयान्तःकरणे विलसन्ती विस्फोरयति शास्त्रस्य पङ्क्तिततिं, नवनवस्पन्दवती चिन्तना च येषां शास्त्रस्यानन्तव्योम्नि निरर्गलं प्रधावति, तेभ्योऽनन्तकीर्तिभ्यो राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदं विभूषयद्भ्य आचार्यराधावल्लभत्रिपाठिमहाभागेभ्यः कृतिमिमां समर्प्य कृतार्थतामनुभवामि।

यस्य भ्रुकुटिविलासेन सृष्टिलयौ भवतस्तस्यैव कृपाकटाक्षेण निष्पन्नेयं कृतिरियमवश्यमेव भविष्यति विदुषां मनोमोदायेति प्रत्येति --

गीता जयन्ती
मार्गशीर्ष शुक्लैकादशी
दि. ६.१२.२०११
बिलासपुरम्



इत्संज्ञाप्रकरणम्

मया सस्वरः पाणिनीयधातुपाठो विरचितः। तत्र सर्वे धातवः सस्वराः सन्ति। तत्र स्वरानाश्रित्य पदनिर्णयस्य विधिर्विशेषेण व्याख्यातः। धातवः, प्रत्ययाश्च, यथा विहितास्तथैव न प्रयुज्यन्ते। तत्रानुबन्धा आसञ्जिताः। यथा – डुकृञ् अयं धातुः। वस्तुतोऽत्र 'कृ' अयं धातुः। आदौ 'डु' अन्ते 'ञ्', इमावनुबन्धौ। एवमेव – टुनदि, ञिमिदा, डुपचष् इत्यादिष्वपि आदावन्ते चानुबन्धौ। बाधृ, अञ्चु, शद्लृ, गम्लृ इत्यादिष्वन्तेऽनुबन्धाः। प्रत्ययेष्वप्यनुबन्धा आसञ्जिताः। यथा ण्वुल् इत्यत्रादौ 'ण्' अन्ते 'ल्', इत्यनुबन्धौ। एवमेव ष्वुन्, षाकन्, इत्यादिषु। आदावेतेषामनुबन्धान् विज्ञाय, तेषामित्संज्ञा, लोपश्च क्रियेत।

उपदेशेऽजनुनासिक इत् (१.३.२) – उपदेशे योऽनुनासिकोऽच् स इत्संज्ञो भवति। यथा – गम्लृँ – गम्। मदीँ – मद्। अञ्चुँ – अञ्च्। गुपूँ – गुप्। कटेँ – कट्। वदिँ – वद्, इत्यादिष्वनुनासिकस्याच इत्संज्ञा भवति।

हलन्त्यम् (१.३.३) – धात्वादेः समुदायस्य यदन्त्यं हल्, तदित्संज्ञं भवति। यथा – 'डुपचँष्' इत्यत्र 'ष्', 'शीङ्' इत्यत्र 'ङ्' 'शप्' इत्यत्र 'प्', 'श्नम्' इत्यत्र 'म्' 'णिच्' इत्यत्र 'च्' इत्येते इतः।

इर इत्संज्ञा वाच्या (वार्तिकम्) – 'भिदिर्' – भिद्। 'छिदिर्' – छिद्। ईशुचिर् – शुच्। 'णिजिर्' – निज्। 'विजिर्' – विज्।

तस्य लोपः (१.३.९) – यस्येत्संज्ञा, तस्य लोपो भवति।

एतैः सूत्रैः धातुपाठे पठितधातूनामित्संज्ञा विधातव्या। यत्राकारस्येत्संज्ञा भवति, ते धातव आदितः, यथा – ञिमिदाँ, ञिष्विदाँ। यत्र इकारस्येत्संज्ञा, ते इदितः, यथा – वदिँ, मदिँ। यत्र ईकारस्येत्संज्ञा, ते ईदितः, यथा – मदीँ, नृतीँ। यत्र उकारस्येत्संज्ञा, ते उदितः, यथा – ध्वंसुँ, अञ्चुँ। यत्र ऊकारस्येत्संज्ञा, ते ऊदितः, यथा – गुपूँ, अक्षूँ। यत्र ऋकारस्येत्संज्ञा, ते ऋदितः, यथा – गाधृँ, बाधृँ। यत्र एकारस्येत्संज्ञा, ते एदितः, यथा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- कटेँ, रगेँ। यत्र ओकारस्येत्संज्ञा, त ओदितः, यथा - टुओँश्वि, टुओँस्फूर्जी। यत्र ङकारस्येत्संज्ञा, ते ङितः, यथा - शीङ्, डीङ्। यत्र ञकारस्येत्संज्ञा, ते ञितः, यथा - भृञ्, हृञ्। यत्र षकारस्येत्संज्ञा, ते षितः, यथा - डुपचँष्, जृष्, झृष्। यत्र 'टु' इत्यस्येत्संज्ञा, ते ट्वितः, यथा - टुओँश्वि, टुओँस्फूर्जी। यत्र 'डु' इत्यस्येत्संज्ञा ते ड्वितः, यथा - डुपचँष्, डुवपँ। एतैरनुबन्धैरेव शास्त्रप्रवृत्तिर्भवति। अत इमे सावधानतया स्मर्तव्याः।

धातूनामित्संज्ञानन्तरमेतेषां चतुर्णां कार्याणां विचारो भवेत्। यत्र प्राप्तिर्भवेदेतेषां, तत्रैतानि कार्याणि भवन्ति।

१. धात्वादेः षः सः (६.१.६४.) - धातोरादेः षकारस्य स्थाने सकारादेशो भवति। यथा - ष्वद् = स्वद्। ष्णा = स्ना। ष्ठा = स्था।

सुब्धातुष्ठिवुष्वष्कादीनां सत्वप्रतिषेधो वक्तव्यः (वार्तिकम्) - ष्वष्क, ष्ठिवु, एतयोर्नामधातूनां च षकारस्य स्थाने सकारादेशो न भवति। ष्वष्कते। ष्ठीवति। षण्ढीयते।

२. णो नः (६.१.६५) - धातोरादेर्णकारस्य स्थाने नकारादेशो भवति। यथा - णट = नट्। णम् - नम्।

३. इदितो नुम् धातोः (७.१.५८) - येषां धातूनां इकारस्य इत्संज्ञा भवति, ते 'इदितः'। इदितो धातोर्नुमागमो भवति। यथा - वदि - वद् - वन्द्। - नश्चापदान्तस्य झलि इति नकारस्यानुस्वारे - वंद् - अनुस्वारस्य ययि परसवर्ण इति परसवर्णे - वन्द्। एवमेव - लाछि - लाछ् - लान्छ् - लांछ् - लाञ्छ्। कपि - कप् - कन्प् - कंप् - कम्प्।

४. उपधायां च (८.२.७८) - येषां धातूनामुपधायां भवेतां रेफवकारौ हल्परौ, ताभ्यां प्राग् वर्तमानस्येको दीर्घः। यथा - कुर्द् - कूर्द् / खुर्द् - खूर्द् / गुर्द् - गूर्द्।

पदनिर्णयविधिः

अष्टाध्याय्याः प्रथमाध्याये तृतीये पादे - 'अनुदात्तङित आत्मनेपदम् १.३.१२' इत्यत आरभ्य 'लुटि च क्लृपः १.३.९३' इत्यापादान्तैः सूत्रैर्धातूनां पदनिर्णयः क्रियते, यत् कस्माद् धातोः कस्य पदस्य प्रत्यया भवेयुः। अनुबन्धकार्यानन्तरमेतत्प्रकरणं सावधानतयाध्येयम्।

अनुदात्तङित आत्मनेपदम् (१.३.१२) - अविशेषेण धातोरात्मनेपदं, परस्मैपदं च विधास्यते। तत्रायं नियमः क्रियते। धातुपाठे ये धातवो अनुदात्तेतो, ङितश्च पठिताः, तेभ्य एवात्मनेपदं भवति, नान्येभ्यः। अनुदात्तेभ्यः - आस॒ - आस्ते। वस॒ - वस्ते। एध॒ - ङिद्भ्यः खल्वपि - षूङ् - सूते। शीङ् - शेते। एतदनुसारेण धातुपाठ आत्मनेपदिनां धातूनां रूपाणि 'ते' इति प्रत्ययेन निर्दिष्टानि।

स्वरितञितः कर्त्रभिप्राये क्रियाफले (१.३.७२) - स्वरितेतो ये धातवो, ञितश्च, तेभ्य आत्मनेपदं भवति, कर्तरि चेत् क्रियाफलमभिप्रैति। परगामिनि क्रियाफले परस्मैपदम्। यजँ - कर्तृगामिनि क्रियाफले - यजते। परगामिनि क्रियाफले - यजति। पचँ - कर्तृगामिनि क्रियाफले - पचते। परगामिनि क्रियाफले - पचति।

ञितः खल्वपि - षुञ् - कर्तृगामिनि क्रियाफले - सुनुते। परगामिनि क्रियाफले - सुनोति। डुकृञ् - कर्तृगामिनि क्रियाफले - कुरुते। परगामिनि क्रियाफले - करोति।

एतदनुसारेण धातुपाठे उभयपदिनां धातूनां रूपाणि 'ति' 'ते' इत्युभाभ्यां प्रत्ययाभ्यां निर्दिष्टानि।

शेषात्कर्तरि परस्मैपदम् (१.३.७८) - येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदमुक्तं, ततो यदन्यत् स शेषः। शेषात् कर्तरि परस्मैपदं भवति। (ये धातवोऽनुदात्तेतो, ङितः, स्वरितेतो, ञितश्च न सन्ति, तेभ्यो भवति परस्मैपदम्)। या - याति। वा - वाति। पठँ - पठति। गम्लृँ - गच्छति। एतदनुसारेण धातुपाठे परस्मैपदिनां धातूनां रूपाणि 'ति' इति प्रत्ययेन निर्दिष्टानि।

क्वचिद् धातूनामर्थमाश्रित्य, क्वचिच्चोपसर्गयोगेन पदं परिवर्तते, तानि सूत्राणि कोषमध्ये, धातोरधस्तादेव निवेशितानि।

अन्यच्च पदविषयकं सर्वं तत्तत्प्रकरणे निवेशितम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयानुक्रमणी

कोषस्यादौ १-१२ पृष्ठेषु धात्वनुक्रमणिका वर्तते । तत्र सर्वे धातवोऽकारादि-क्रमेण सन्ति । ततो जिज्ञासितधातोः क्रमाङ्कं ज्ञात्वा तस्मिन्न्नेव क्रमाङ्के तस्य धातो रूपाणि कोषे पश्यन्तु ।

१३-२१६ पृष्ठेषु तिङन्तकोषोऽस्ति । अस्मिन् कोषे पाणिनीयधातुपाठे पठितानां सर्वेषामौपदेशिकधातूनां तिङन्तरूपाणि चतुर्दशसु स्तम्भेषु लृट्, लृङ्, लुट्, आशीर्लिङ्, लुङ्, लिट् इत्येतेषु षट्सु लकारेषु लिखितानि सन्ति, अथ च णिजन्तधातूनां, सन्नन्तधातूनां, यङन्तधातूनां च रूपाण्यपि प्रथमपुरुषैकवचन एव लिखितानि सन्ति । भावे कर्मणि चापि रूपं प्रथमपुरुषैकवचन एव लिखितम् । अनन्तरं परिशिष्टेषु तेषां सर्वाणि रूपाणीति क्रमः ।

कोषे चतुर्दशानां स्तम्भानामयं क्रमः -

प्रथमस्तम्भे - अस्य धातुपाठस्य धातुक्रमाङ्कः ।
द्वितीयस्तम्भे - पाणिनीयो धातुः, तस्य पाणिनीयधातुपाठक्रमाङ्कश्च ।
तृतीयस्तम्भे - निरनुबन्धो धातुः ।
चतुर्थस्तम्भे - राष्ट्रभाषायां धातोः संभावितोऽर्थः ।
पञ्चमस्तम्भे - लृट्लकारप्रथमपुरुषैकवचनरूपम् ।
षष्ठस्तम्भे - लृङ्लकारप्रथमपुरुषैकवचनरूपम् ।
सप्तमस्तम्भे - लुट्लकारप्रथमपुरुषैकवचनरूपम् ।
अष्टमस्तम्भे - आशीर्लिङ्लकारप्रथमपुरुषैकवचनरूपम् ।
नवमस्तम्भे - लुङ्लकारप्रथमपुरुषैकवचनरूपम् ।
दशमस्तम्भे - लिट्लकारप्रथमपुरुषैकवचनरूपम् ।
एकादशस्तम्भे - णिजन्तधातोः लट्लकारप्रथमपुरुषैकवचनरूपम् ।
द्वादशस्तम्भे - सन्नन्तधातोः लट्लकारप्रथमपुरुषैकवचनरूपम् ।
त्रयोदशस्तम्भे - यङन्तधातोः लट्लकारप्रथमपुरुषैकवचनम् ।
चतुर्दशस्तम्भे - भावे कर्मणि लट्लकारप्रथमपुरुषैकवचनम् ।

एषां सर्वाणि रूपाण्येषु द्वादशसु परिशिष्टेषु द्रष्टव्यानि

परिशिष्टम्		-	प्रकरणम्	पृष्ठम्
परिशिष्टम् १		-	लृट्लकाररूपाणि	२१७
परिशिष्टम् २		-	लृङ्लकाररूपाणि	२१९
परिशिष्टम् ३		-	लुट्लकाररूपाणि	२२२
परिशिष्टम् ४		-	आशीर्लिङ्लकाररूपाणि	२२३
परिशिष्टम् ५		-	लुङ्लकाररूपाणि	२२८
परिशिष्टम् ६		-	लिट्लकाररूपाणि	२८७
परिशिष्टम् ७		-	सन्नन्तधातूनां रूपाणि	३५३
परिशिष्टम् ८		-	यङन्तधातूनां रूपाणि	३५६
परिशिष्टम् ९	क.	-	णिजन्तधातूनां दशसु लकारेषु रूपाणि	३६१
परिशिष्टम् ९	ख.	-	णिजन्तधातवस्तेषां लुङ्लकारश्च	३६५
परिशिष्टम् १०	क.	-	यङ्लुगन्तधातवः	४३९
परिशिष्टम् १०	ख.	-	यङ्लुगन्तधातूनां सार्वधातुकलकाराः	४७९
परिशिष्टम् १०.	ग.	-	यङ्लुगन्तधातूनामार्धधातुकलकाराः	६०६
परिशिष्टम् ११.		-	भावकर्मणोः सार्वधातुकलकारेषु रूपाणि	६३३
परिशिष्टम् १२		-	नामधातवः	६३५

इदानीं तिङन्तकोष आरभ्यते----------------

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धात्वनुक्रमणिका

अ .

अक २२४
अकि ९१३
अक्षू १४५०
अग २३९
अगद १९३६
अगि ९५८
अघि ९७४
अङ्क १८१५
अङ्ग १८१६
अज २६१
अजि १६१०
अञ्चु १५९८
अञ्चु ९८५
अञ्चु ९८७
अञ्जू १०३५
अट २७४
अट्ट १०८०
अट्ट १८३९
अठि १०९३
अड ३०१
अड्ड ११४४
अण ३०७
अण ३०६
अत ३२५
अति ११५७
अद ३३८
अदि ११७६
अन ३८३
अनोरुध ७५४
अन्ध १८७१
अबि १२६३
अभ्र १३१८
अम ४३१
अम १७३१
अम्बर १९४९
अय ४३२
अरर १९५८
अर्क १८१२
अर्च १५९९
अर्च ९८६
अर्ज १०३४
अर्ज १८२५
अर्थ १८६४
अर्द ११७५
अर्द १६४०
अर्ब १२६२
अर्व १३६४
अर्ह १६८१
अर्ह १५०१
अर्ह १९३०
अल ४४९
अव ४७७
अश ४८१
अशू ४८०
अस ५०१
अस ४९९
अंस १९२८
असु ५००
असु १९६४
असु १९६३
असुञ १९६३
अह ५४०
अहि १६७७
अहि १५००

आ .

आछि १०१२
आप्लृ १६४३
आप्लृ १२५३
आस १४८०

इ .

इक् ८३
इख ५४४
इखि ९४४
इगि ९५९
इङ् ८२
इट ५५६
इण् ८४
इदि ११७८
इन्धी १२१९
इरज् १९६६
इरञ् १९६५
इरस् १९७१
इल ६०४
इल १७७२
इवि १३६२
इष ६३३
इष ६३४
इष ६३५
इषुध १९३९

ई .

ईक्ष १४४८
ईखि ९४५
ईङ् १२०
ईज १०३०
ईड ११४५
ईड १८४६
ईर १३१७
ईर १६५५
ईर्क्ष्य १३०४
ईश १४०९
ईष १४२२
ईष १४२०
ईर्ष्य १३०५
ईह १४९८

उ .

उक्ष १४४९
उख ६६१
उखि ९४६
उङ् १३९
उच ६७४
उछि १०१३
उछि १०१४
उच्छी १०१५
उच्छी १०१६
उज्झ १०७९
उठ ७०६
उध्रस ५०२
उध्रस १५५१
उन्दी ११७७
उब्ज १०३३
उभ ७८५
उम्भ १२८३
उरस् १९७७
उर्द ११७९
उर्वी १३६३
उष ८०३
उषस् १९७२
उहिर् ८३८

ऊ .

ऊन १८७५
ऊयी १३०३
ऊर्ज १८२७
ऊर्णुञ् १२१
ऊष १४२१
ऊह १४९९

ऋ .

ऋ १८८
ऋ १८९
ऋच ८४०
ऋच्छ १०११
ऋज ८४३
ऋजि १०२९
ऋणु ८५७
ऋधु ८७२
ऋधु ८७३
ऋफ ८८५
ऋम्फ १२५४
ऋषी ९०५

ॠ .

ॠ २२३

ए .

एजृ १०३१
एजृ १०३२
एठ १०९२
एध १२२०
एला १९५५
एषृ १४२३

ओ .

ओखृ ९४३
ओणृ ११४६
ओलडि १६१५

क .

कक २३१
ककि ९२१
कख २३३
कखे २३२
कगे २४६
कच २६०
कचि १०००
कटी २७७
कटे २७६
कठ २९९
कठि १६१६
कठि १०९६
कड ३०३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कड	३०५	कर्ब	१२७९	कु	१५१	कुथि	११५९	कूण	१८५१	केला	१९५६	क्लदि	११८९	क्षिणु	५६७
कडि	१११७	कर्व	१३९३	कुक	६६०	कुद्रि	१९०३	कूण	१८५४	केलृ	१३३३	क्लमु	४१६	क्षिप	५९४
कडि	१६२१	कल	४७६	कुङ्	१२२	कुन्थ	११६६	कूल	१३४८	कै	३०	क्लिदि	११९२	क्षिप	५९५
कड्ड	१११४	कल	१७४२	कुङ्	१४१	कुप	७६४	कृञ्	२००	क्नसु	५१७	क्लिदि	१२१७	क्षिप	१७६८
कण	३१९	कल	१७४३	कुच	६७१	कुप	१५६५	कृञ्	२०१	क्नूञ्	१६९	क्लिदू	५७७	क्षिवु	६१९
कण	३१४	कल्ल	१३५९	कुच	६७२	कुबि	१२६९	कृड	८५२	क्नूयी	१३१५	क्लिश	६२९	क्षीज	१०५३
कण	१७१३	कष	४९५	कुच	६७३	कुबि	१६४८	कृती	८६५	क्मर	४४७	क्लिशू	६२७	क्षीबृ	१२६५
कण्डूञ्	१९६२	कस	५२०	कुजु	६७७	कुमार	१८९४	कृती	८६६	क्रथ	३३७	क्लीबृ	१२६४	क्षीष्	९७
कत्र	१६५२	कसि	१४८५	कुञ्च	९९०	कुर	७९२	कृप	१७९९	क्रदि	१२११	क्लेश	१४१०	क्षु	१३६
कथ	१७२०	काक्षि	१४६२	कुट	६९१	कुर्द	११९३	कृप	१८००	क्रदि	११८८	क्वण	३१५	क्षुदिर्	७४१
कत्थ	११७१	काचि	१००१	कुट्ट	१८३५	कुल	७९९	कृपू	८७९	क्रन्द	१८६८	क्वथे	३२९	क्षुध	७४९
कदि	११८७	काशृ	१४१२	कुट्ट	१८३६	कुस	८२६	कृवि	१३७५	क्रप	३९०	क्षजि	१०६५	क्षुभ	७७८
कदि	१२१०	काशृ	१४११	कुठि	११००	कुशि	१६६३	कृश	८९३	क्रमु	४२०	क्षणु	३०८	क्षुभ	७७७
कनी	३७१	कासृ	१४८७	कुड	७१३	कुष	८२२	कृष	९०३	क्रीञ्	१००	क्षपि	१६४६	क्षुभ	७८२
कपि	१२४१	कि	७६	कुडि	११०५	कुषुभ	१९४०	कृष	९०४	क्रीडृ	११३३	क्षमू	४१५	क्षुर	७९४
कबृ	३९८	किट	५५७	कुडि	११२३	कुसि	१६६९	कॄ	२१८	क्रुञ्च	९९८	क्षमूष्	४१८	क्षेवु	१३८१
कमु	४१९	किट	५५८	कुडि	१६२२	कुस्म	१८८९	कॄ	२२१	क्रुड	७२२	क्षर	४४८	क्षोट	१८४४
कर्ज	१०५९	कित	५६८	कुण	७२९	कुह	१७९६	कॄञ्	२११	क्रुध	७४८	क्षल	१७३९	क्षै	४१
कर्ण	१८९१	किल	६०८	कुण	१७८५	कूज	१०५४	कॄत	१८५९	क्रुश	८०१	क्षि	६९	क्ष्णु	१३७
कर्त	१६४६	कीट	१८३०	कुत्स	१९२५	कूट	१८४१	केत	१८६३	क्लथ	३३६	क्षि	७०	क्ष्मायी	१३१२
कर्द	१२०७	कील	१३४७	कुथ	७३५	कूट	१८४२	केपृ	१२४७	क्लदि	१२१२	क्षि	६९	क्ष्मील	१३४३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्ष्विदा ५७४
क्ष्वेलृ १३३५
ख .
खच २५२
खज २७०
खजि १०४४
खट २९२
खट्ट १८३२
खड १७१०
खडि १११८
खडि १६२०
खद ३४७
खनु ३६९
खर्ज १०६०
खर्द १२०८
खर्ब १२७८
खर्व १३९४
खल्ल १३५३
खल ४६९
खष ४९६
खादृ १२१८
खिट ५५९
खिद ५८३
खिद ५८४
खिद ५८५
खुजु ६७८
खुडि १६२४
खुर ७९१
खुर्द ११९४
खेट १८४३
खेला १९५७
खेलृ १३३४
खै २६
खोर्ऋ १३२१
खोलृ १३३९
ख्या ६३
ग.
गज २७१
गज १६९६
गजि १०४९
गड ३०४
गडि ११०७
गडि ११०८
गण १७१४
गद ३५७
गद १७२१
गद्गद १९३५
गन्ध १८७२
गम्लृ ४०६
गर्ज १०५७
गर्द १२०५
गर्ब १२७९
गर्व १३९५
गर्व १६५८
गर्ह १५०८
गर्ह १६८३
गल ४७०
गल १७४७
गल्भ १२९८
गल्ह १५१२
गवेष १९१४
गा १२
गाङ् ११
गाधृ १२२९
गाहू १५१८
गु १२४
गुङ् १४०
गुज ६८१
गुजि १०४०
गुड ७१८
गुडि १६२३
गुण १७८६
गुद ७३८
गुध ७४५
गुध ७४६
गुप ७५६
गुप ७६५
गुप १५६४
गुपू ७५७
गुफ ७७२
गुम्फ १२६१
गुरी १३२६
गुर्द ११९५
गुर्द १८६५
गुर्वी १३८७
गुहू ८३७
गूर १८९६
गूरी ७८६
गृ १८१
गृ १६८९
गृज ८४५
गृजि १०५०
गृधु ८७४
गृह १८०२
गृहू ९१२
गॄ २१९
गॄ २२२
गेपृ १२४८
गेवृ १४०३
गेषृ १४३७
गै १३
गोम १८८७
गोष्ट १०८४
ग्लसु ५२७
ग्लह ५३८
ग्लुचु २४७
ग्लुञ्चु ९९६
ग्लेपृ १२४५
ग्लेपृ १२४९
ग्लेवृ १४०४
ग्लै ४२
ग्रथि ११७०
ग्रन्थ ११६५
ग्रन्थ १६३४
ग्रन्थ १६३५
ग्रस १५५२
ग्रसु ५२६
ग्रह ५३९
ग्राम १८८५
ग्रुचु ६६८
घ .
घघ २४७
घट २७५
घट १५३४
घट १७००
घट्ट १०८१
घट्ट १८३१
घटि १६१२
घस्लृ ५०३
घिणि ११५३
घुङ् १४२
घुट ६८८
घुट ७००
घुण ७२३
घुण ७२४
घुणि ११५४
घुर ७९५
घुषि १४३४
घुषिर् १५६८
घुषिर् ८१०
घूर्ण ११५१
घूर्ण ११५६
घूरी १३२७
घृ १६९०
घृ १८३
घृ १८२
घृणि ११५५
घृणु ८६२
घृषु ८९९
घ्रा ५६
ङ .
ङुङ् १४३
च .
चक २२७
चक २३०
चक्क १८०७
चकासृ १४९५
चक्षिङ् १४७९
चञ्चु ९९१
चट १६९९
चडि १११३
चण ३२१
चते ३२७
चदि १२१३
चदे ३५५
चंप ३९२
चपि १६४५
चमु ४२५

CC-0. In Public Domain. Cuddalore Collection. TN.

चमु ४२३
चय ४३७
चर ४४५
चर १७३८
चरण १९४२
चर्करीतं १५२०
चर्च १००८
चर्च १००९
चर्व १३९१
चर्ब १२८२
चर्च १८१९
चल ४५२
.चल ४५३
चल १७४५
चष ४८७
चह १७५७
चह १७६१
चह ५३७
चायृ १३१०
चि १५२२
चिञ् १५२१
चिञ् ८८
चिट ५६२
चित १७६४
चिति १६३२
चिती ५६९
चित्र १६५३
चिरि ९०
चिल ६०९
चिल्ल १३५४
चीक १५८७
चीभृ १२९४
चीव १६५७
चीवृ १३९८
चुक्क १८०८
चुट ६९८
चुट १७७८
चुट्ट १८३८
चुटि १६१४
चुड ७२०
चुडि ११०६
चुड्ड ११४२
चुद १७८७
चुप ७६२
चुबि १२७२
चुबि १६४७
चुर १७९०
चुरण १९४४
चुल १७९४
चुल्ल १३५५
चूरी १३३०
चूर्ण १८४८
चूर्ण १८४९
चूष १४२४
चृती ८६७
चेलृ १३३२
चेष्ट १०८३
च्यु १६८६
च्युङ् १४४
च्युतिर् ७३०

छ.

छजि १६०८
छद १५४२
छद १७२२
छदि १६३९
छमु ४२१
छर्द १८६९
छष ४८९
छिदिर् ५८०
छिद्र १६५९
छुट ६९९
छुप ७५९
छुर् ७८७
छृदिर् ८६९
छृदी १५७३
छेद १८७०
छो १९

ज.

जक्ष १४५८
जज २६७
जजि १०४७
जट २८७
जन ३६८
जनी ३६७
जप ३९१
जभि १६५१
जभी ४०१
जमु ४२३
जर्ज १०६१
जर्ज १०६२
जल ४५४
जल १७४१
जल्प १२३९
जष ४९४
जसि १६७२
जसु ५०४
जसु १५४९
जसु १५५०
जागृ १९०
जि ७४
जि ७५
जि १५२३
जिरि ९१
जिवि १३७३
जिषु ६३८
जीव १३८०
जुगि ९७१
जुड १७८४
जुड ७११
जुड ७१२
जुतृ ७३३
जुष १५६६
जुषी ८२३
जूरी १३२८
जूष १४३२
जृभि १२९२
जृ २१६
जॄ १५३२
जृष् २१५
जेषृ १४३९
जेहृ १५१७
जै २७
ज्ञप १७२८
ज्ञा ६५
ज्ञा १६८५
ज्या ३९
ज्युङ् १४५
ज्रि ७२
ज्रि १५२४
ज्वर ४४४
ज्वल ४६५

झ.

झट २९०
झमु ४२२
झर्झ १०७७
झर्झ १०७८
झष ४९०
झष ४९१
झॄष् २१७

ट.

टकि १५८८
टल ४६१
टिकृ ५४१
टीकृ ९२६
ट्वल ४६२

ड.

डप १७३०
डिप ५९९
डिप ६००
डिप १७६६
डिप १७६७
डीङ् ११२
डीङ् ११३
डुपचष् २५३
डुलभष् ४००

ढ.

ढौकृ ९३५

ण.

णक्ष १४५६
णख २३६
णखि ९५०
णट २८०
णट २८१
णद ३४६
णद १५४०
णभ ४०३
णभ ४०४
णभ ४०५

Digitization by eGangotri-South Center

णम ४०७
णय ४३९
णल ४५५
णश ४८२
णस ५२५
णह ५३४
णासृ १४८९
णिक्ष १४५९
णिजि १०६६
णिजिर् ५५१
णिदि १२१६
णिदृ ५८८
णिल ६१२
णिवि १३६९
णिश ६३१
णिसि १४८६
णीञ् १०७
णीव १३७९
णु १३३
णुद ७४०
णुद ७४३
णू १५९
णेदृ ११८२
णेषृ १४४०
ष्णिह् १७६५

त.

तक २२६
तकि ९१४
तक्ष १४५२
तक्षू १४५१
तगि ९६४
तञ्चु ९९२
तञ्चू ९९७
तट २८८
तड १५३७
तड १७०९
तडि १११५
तत्रि १९०१
तनु ३६५
तनु १५४५
तन्तस् १९७३
तप ३८५
तप ३८९
तप १५४६
तमु ४१२
तय ४३८
तरण १९४१
तर्क १५८४
तर्ज १०५८
तर्ज १८२६
तर्द १२०६
तल १७४०
तसि १६७३
तसु ५०५
तायृ १३११
तिक ५४३
तिकृ ५४२
तिग ५४६
तिज ५५५
तिज १७६२
तिपृ ५९७
तिम ६०२
तिल ६०६
तिरस् १९७६
तिल ६०७
तिल १७७१
तीकृ ९२७
तीव १३७८
तीर १८९२
तुज ६७९
तुजि १०४८
तुजि १६०५
तुजि १६०६
तुट ६९७
तुड ७१५
तुडि ११२५
तुडृ ७१०
तुण ७२५
तुत्थ १६३७
तुद ७३९
तुप ७६०
तुप ७६३
तुफ ७६९
तुफ ७७१
तुबि १२७१
तुबि १६५०
तुभ ७७५
तुभ ७७९
तुभ ७८४
तुम्प १२३५
तुम्प १२३६
तुम्फ १२५६
तुम्फ १२६०
तुर ७८९
तुरण १९४५
तुर्वी १३८३
तुल १७९१
तुष ८०५
तुस ८२७
तुहिर् ८३१
तूण १८५२
तूरी १३२४
तूल १३५०
तूष १४२५
त्रक्ष १४५४
तृणु ८६१
तृदिर् ८७०
तृप ८८३
तृप ८८१
तृप १५७६
तृम्फ १२५८
तृषा ८९५
तृह ९०८
तृहू ९०९
तृंहू १५०२
तॄ २१४
तेज १०५५
तेपृ १२४३
तेवृ १४००
त्यज २६४
त्रकि ९२४
त्रदि १२०९
त्रपूष् ३९६
त्रस १७५३
त्रसि १६६७
त्रसी ५१५
त्रुट ६९६
त्रुट १७८१
त्रुप ७६१
त्रुफ ७७०
त्रुम्प १२३७
त्रुम्फ १२५७
त्रैङ् ५५
त्रौकृ ९३६
त्वच २५४
त्वगि ९६९
त्वञ्चु ९९३
त्वरा ४४३
त्विष ६५२
त्सर ४४६
त्वक्षू १४७०

थ.

थुड ७१६
थुर्वी १३८४

द.

दक्ष १४७२
दक्ष १४७१
दघ २४९
दण्ड १६१७
दद ३५१
दध ३६१
दमु ४१३
दम्भु १२८४
दय ४३२
दरिद्रा ३७
दल ४५९
दल १५४७
दंश १४१६
दशि १६६२
दशि १६६१
दसि १६७६
दसि १६७०
दसु ५०६
दह ५३०
दाञ् १
दाण् २
दान १२३२
दाप् ३२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दाशृ	१४१८	दुहिर्	८३०	द्रम	४३०	धि	८१	धृष	१५८०	ध्वन	१७२६	पक्ष	१९१७	पर्द	११९६
दाशृ	१४१९	दूङ्	१६५	द्रवस्	१९७५	धिक्ष	१४७३	धृषा	९०१	ध्वस	५०२	पचि	१००४	पर्प	१२३८
दासृ	१४९२	दृ	१८५	द्रा	५०	धिवि	१३७२	धेक्	९२९	ध्वंसु	१४८२	पचि	१५९६	पर्ब	१२७३
दिवि	१३७१	दृङ्	१९४	द्राक्षि	१४६५	धिष	६४३	धेट्	५	ध्वाक्षि	१४६७	पट	२८२	पर्व	१३८८
दिवु	६२१	दृप	८८२	द्राखृ	९५४	धीङ्	११०	धोर्ऋ	१३२२	ध्वृ	१७४	पट	१५३५	पल	४५६
दिवु	१५५५	दृप	८८४	द्राघृ	९८३	धुक्ष		ध्मा	५१		न.	पट	१७०१	पल्यूल	१९१०
दिवु	१५५६	दृभ	१५७८	द्राड़ृ	११२७	१४७७		ध्यै	६१	नक्क	१८०५	पठ	२९४	पश	१७५९
दिश	६२३	दृभी	८८७	द्राहृ	१५१५	धुञ्	१३२	ध्रज	२६८	नट	१५३६	पडि	१११६	पष	१७५१
दिह	६५६	दृभी	१५७७	द्रु	१२६	धुर्वी	१३८६	ध्रजि	१०४१	नट	१६९८	पडि	१६२७	पसि	१६७४
दीक्ष	१४७६	दृम्फ	१२५९	द्रुण	७२६	धू	१६०	ध्रण	३८०	नदि	१२१४	पण	३२४	पा	१६
दीङ	१०८	दृशिर्	८९०	द्रुह	८३४	धूञ्	१५२९	ध्राक्षि	१४६६	नल	१५४८	पत	१५३८	पा	२१
दीधीङ्	११८	दृह	९०६	द्रूञ्	१६७	धूञ	१७०	ध्राखृ	९५५	नर्द	१२०४	पत्लृ	३२८	पार	१८९१
दीपी	१२४२	दृहि	१५०४	द्रेकृ	९२८	धूप	१२३४	ध्राड़ृ	११२८	नस	१७५४	पथि	१६३३	पाल	१९०६
दु	१५३	दॄ	२१३	द्रै	४८	धूप	१६४४	ध्रु	१२९	नाथृ	११७३	पथे	३३०	पि	८०
दु	१३०	देङ्	३	द्विष	६४५	धूरी	१३२५	ध्रु	१२३	नाधृ	१२२७	पद	३५०	पिच्छ	१८२२
दुःख	१५८९	देवृ	१४०१		ध.	धूस	१९२२	ध्रेक	१८१७	निवास	१९२७	पद	१७२३	पिजि	१६०२
दुःख	१९३२	दैप्	३१	धक्क	१८०६	धृङ्	१९१	ध्रै	५९	निष्क	१८१४	पन	३८२	पिजि	१६०७
दुर्वी	१३८५	दो	४	धन	३७९	धृङ्	१९२	ध्वज	२६९	नील	१३४५	पम्पस्	१९७४	पिजि	१०६८
दुल	१७९२	द्यु	१५४	धवि	१३६६	धृज	८४४	ध्वजि	१०४३	नृती	८६४	पयस्	१९७८	पिट	५६५
दुष	८०६	द्युत	७३४	धाञ्	६	धृजि	१०४२	ध्वण	३१८	नॄ	२२०	पय	४३५	पिठ	५६६
दुह	८२९	द्यै	४४	धावु	१३९९	धृञ्	१९७	ध्वन	३७८		प.	पर्ण	१६३१	पिडि	१६२८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पिवि	१३६७	पुल	७९८	पृची	८४१	प्रीङ्	९२	फुल्ल	१३५६	बिल	६११	भज	१६९७	भिक्ष	१४७५
पिडि	११२०	पुल	१७९३	पृची	८४२	प्रीञ्	१०१	फेल्ट	१३३७	बिल	१७७०	भजि	१६०४	भिदिर्	५७९
पिश	६३२	पुष	८०७	पृड	८५५	प्रीञ्	१५२५	ब.		बिस	६५४	भञ्जो	१०३८	भिषज्	१९६७
पिष्ल्ट	६४९	पुष	८११	पृण	८५८	प्रुङ्	१४६	बख	२३४	बुक्क	१८०४	भट	२७९	भिष्णज्	१९६८
पिस	१७७४	पुष	८१३	पृथ	१७९८	प्रुड	७०८	बद	३४४	बुक्क	९४१	भट	२९१	भी	११५
पिसि	१६६८	पुष	१५६७	पृषु	८९६	प्रुषु	८१५	बध	३५८	बुगि	९७२	भडि	१११२	भुज	६८३
पिसृ	६५३	पुष्प	१२४०	पृ	२०८	प्लुषु	८१६	बध	१७२५	बुध	७४७	भडि	१६२६	भुजो	६७६
पीङ्	१०५	पुस्त	१८५६	पृ	२०९	प्रेषृ	१४४१	बन्ध	१२२२	बुध	७५२	भण	३१३	भुवो	१६८७
पीड	१८४७	पुंस	१९२१	पृ	१५३१	प्रोथृ	११७४	बर्ब	१२७५	बाहृ	१५१४	भदि	११८४	भुरण	१९४६
पील	१३४४	पूङ्	१६४	पेल्ट	१३३६	प्लिह	६५९	बर्ह	१५०९	बुधिर्	७४४	भर्व	१३९२	भू	१७२
पीव	१३७६	पूज	१८२३	पेवृ	१४०५	प्ली	९९	बर्ह	१९२९	बुन्दिर्	११८०	भर्त्स	१९२४	भू	१५२८
पुट	६९४	पूञ्	१६६	पेषृ	१४३८	प्लुङ्	१४७	बर्ह	१६८३	बुस	८२४	भल	४७५	भूष	१४३३
पुट	१५६०	पूयी	१३१४	पेसृ	१४९३	प्लुष	८०९	बल	४५७	बुस्त	१८५७	भल	१७४८	भूष	१९१२
पुट	१७८२	पूरी	१६५६	पै	२०	प्लुष	८१७	बल	१७४४	बृह	९०७	भल्ल	१३६१	भृजी	८५०
पुटि	१६१३	पूरी	१३२३	पैणृ	११४७	प्लुष	८१८	बहि	१५०६	बृहि	१५०५	भष	४९८	भृञ्	१९८
पुट्ट्	१८३७	पूल	१३५१	प्यायी	१३१६	प्लुष	८१९	बल्ह	१५११	बृहि	१६७८	भस	५२१	भृञ्	१९९
पुड	७१४	पूल	१९०४	प्यैङ्	५३	प्सा	६४	बल्ह	१६८४	ब्रूञ	१५८	भा	३४	भृशि	१६६४
पुण	७२७	पूर्व	१३९७	प्रच्छ	१०१७	फ.		बस्त	१८६०	ब्रूस	१९२३	भाज	१८२८	भृशु	८९१
पुथ	७३६	पूष	१४२६	प्रथ	३३३	फक्क	९४०	बाडृ	११२६	ब्ली	९८	भाम	१२९९	भृ	२०६
पुथ	१५६३	पृ	१८४	प्रथ	१७१८	फण	३०९	बाधृ	१२२८	भ.		भाम	१८८३	भेषृ	१४४५
पुथि	११६०	पृङ्	१९३	प्रस	५२४	फल	४५१	बिट	५६३	भक्ष	१९१९	भाष	१४३६	भ्यस	५२९
पुर	७९६	पृच	१५६९	प्रा	५२	फला	४५०	बिदि	१२१५	भज	२६३	भासृ	१४८८	भ्रक्ष	१४६८

CC-0. In Public Domain. Cuddalore Collection. TN.

भ्रण	३१७	मगि	९६३	मभ्र	१३२०	माङ्	१०	मी	१५२७	मुर्वी	१३८२	मृष	१५७९		य.
भ्रमु	४१०	मघि	९७५	मय	४३६	मान	१२३१	मीङ्	१०९	मुष	८२१	मृषु	८९८	यक्ष	१९१८
भ्रमु	४१७	मघि	९७९	मर्च	१८१९	मान	१६४२	मीञ्	११७	मुस	८२५	मृ	२०७	यज	२६२
भ्रंशु	१४८३	मच	२५८	मर्ब	१२७६	मान	१८७४	मीमृ	१३०२	मुस्त	१८५५	मेङ्	८	यत	१७१६
भ्रस्ज	१०७६	मचि	१००३	मर्व	१३९०	मार्ग	१५९०	मील	१३४०	मुह	८३५	मेदृ	११८१	यती	३२६
भ्रंशु	१४१७	मठ	२९५	मल	४७२	मार्ज	१८२४	मीव	१३७७	मूङ्	१६१	मेधृ	१२२६	यत्रि	१९००
भ्राजृ	१०७३	मठि	१०९५	मल्ल	१३६०	माहृ	१५१९	मुच	१७७७	मूत्र	१६५४	मेधा	१९५४	यभ	४०२
भ्राजृ	१०७२	मडि	११११	मव	४७८	मिच्छ	१०२४	मुच्लृ	६६२	मूल	१३५२	मेपृ	१२५०	यम	१७३४
भ्राशृ	१४१४	मडि	११०९	मव्य	१३०६	मिजि	१६०१	मुचि	१००२	मूल	१९०४	मेवृ	१४०६	यम	४०८
भ्री	९६	मडि	१६२५	मष	४९२	मिञ्	८९	मुज	६८०	मूष	१४२७	म्ना	६०	यसु	५०८
भ्रूण	१८५३	मण	३११	मश	४८३	मिदा	५७३	मुजि	१०५१	मृक्ष	१४६०	म्रक्ष	१९२०	या	३३
भ्रेजृ	१०७१	मत्रि	१९०२	मस्क	९३९	मिदा	५७५	मुट	६९५	मृग	१७९७	म्रद	३५३	याचृ	१००५
भ्रेषृ	१४४६	मथि	११६२	मसी	५०७	मिदि	१६३८	मुट	१७७९	मृङ्	१९५	म्रुचु	६६६	यु	१३४
भेषृ	१४४५	मथे	३३१	मस्जो	१०६४	मिदृ	५८९	मुड	७०७	मृजू	८४७	म्रुञ्चु	९९४	यु	१६८८
भ्लक्ष	१४६९	मद	१७२४	मह	५३६	मिल	६०५	मुठि	१०९७	मृड	८५४	म्रेडृ	११३७	युगि	९७०
भ्लाशृ	१४१५	मदि	११८५	मह	१७५९	मिल	६१४	मुडि	११२४	मृड	८५६	म्लुचु	६६७	युच्छ	१०२५
भ्लेषृ	१४४७	मदी	३४३	महि	१५०७	मिष	६४०	मुडि	११३२	मृड	८५३	म्लुञ्चु	९९५	युज	६८२
	म.	मन	३६४	महि	१६७९	मिषु	६३९	मुण	७२८	मृण	८६०	म्लेच्छ	१०२८	युज	१५५९
मकि	९२०	मनु	३६३	महीङ्	१९५८	मिवि	१३६८	मुद	७३७	मृद	८७१	म्लेच्छ	१८२१	युजिर्	६८४
मख	२३५	मन्थ	११६३	मा	७	मिश	६३०	मुद	१७८८	मृधु	८७८	म्लेटृ	१०८९	युञ्	१५७
मखि	९४८	मन्थ	११६४	माक्षि	१४६४	मिश्र	१६६०	मुर	७९३	मृश	८८९	म्लेवृ	१४०७	युतृ	७३२
मगध	१९३८	मन्तु	१९६०	माङ्	९	मिह	६५८	मुर्छा	१०२२	मृष	९०२	म्लै	४३	युध	७५३

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

युप	७६६	रप	३९४	रासृ	१४९०	रुठ	७०२	रेषृ	१४४२	लजी	२६५	लाजि	१०४६	लुठ	७०४
यूष	१४३१	रफ	३९७	रि	७८	रुठि	११०४	रै	२५	लट	२८४	लाट	१९३४	लुटि	१०८८
यौटृ	१०९१	रफि	१२५५	रि	७९	रुदिर्	७४२	रोडृ	११३९	लड	३०२	लाभ	१८८२	लुठि	११०१
र.		रबि	१२६६	रिगि	९६७	रुधिर्	७५१	रौडृ	११४१	लड	१७११	लिख	५४५	लुठि	११०२
रक	१६९१	रभ	३९९	रिच	१५५४	रुप	७६७	ल.		लडि	१६१९	लिगि	९६८	लुण्ठ	१८४५
रक्ष	१४५३	रमु	४०९	रिचिर्	५४९	रुश	८०२	लक्ष	१९१५	लडि	१६२९	लिगि	१५९१	लुञ्च्	९८८
रख	२३७	रय	४४०	रिफ	६०१	रुशि	१६६५	लक्ष	१९१६	लप	३९५	लिट	१९३३	लुथि	११६१
रखि	९४९	रवि	१३६५	रिवि	१३७४	रुष	८१२	लख	२३८	लबि	१२६७	लिप	५९६	लुप	७६८
रगि	९६०	रस	५१३	रिश	६२५	रुष	८१४	लखि	९५१	लबि	१२६८	लिश	६२४	लुप्लृ	७५८
रगे	२४१	रस	१७५५	रिष	६३७	रुष	१७९५	लग	१६९२	लभष्	३९९	लिश	६२८	लुबि	१२७०
रघि	९७६	रह	५३५	रिष	६४७	रुसि	१६७१	लग	१६८२	लर्ब	१२७४	लिह	६५७	लुबि	१६४९
रघि	१५९३	रह	१७५८	री	१०३	रुह	८३३	लगि	९६१	लल	१७४६	ली	११४	लुभ	७८०
रच	१६९३	रह	१७६०	रीङ्	१०४	रूक्ष	१६६६	लगे	२४०	लष	४८८	ली	१५२६	लुभ	७८३
रञ्ज	१०३६	रहि	१५०३	रु	१३५	रूप	१८७७	लघि	९७७	लस	५१४	लीङ्	१११	लूञ्	१६८
रञ्ज	१०३७	रहि	१६८०	रुङ्	१४८	रूष	१४२९	लघि	१५९२	लस	१७५२	लुजि	१६०३	लूष	१९१३
रट	२८३	रा	३६	रुच	६६४	रेकृ	९३०	लघि	१५९४	लस्जी	१०७०	लुट	६८७	लूष	१४२८
रठ	२९६	राखृ	९५२	रुज	१५५८	रेखा	१९५२	लछ	१०२६	ला	३५	लुट	६९२	लेखा	१९५१
रण	३१०	राघृ	९८१	रुजो	६७५	रेटृ	१०८६	लज	१६९४	लाखृ	९५३	लुट	६९०	लेपृ	१२५२
रण	३२३	राजृ	१०७४	रुट	६८६	रेपृ	१२५१	लज	२६६	लाघृ	९८२	लुट	१५६१	लेट्	१९६९
रद	३४५	राध	१२२४	रुट	१५६२	रेभृ	१२९५	लजि	१६०९	लाछि	१०१८	लुठ	७०१	लेला	१९५३
रध	३६०	राधो	१२२३	रुटि	१०८७	रेवृ	१४०८	लजि	१०४५	लाज	१०५२	लुठ	७०३	लोकृ	९३३

CC-0. In Public Domain. Cuddalore Collection. TN.

लोकृ	१५८३	वट	१७०३	वर्ण	१६३०	वा	२३	विल	१७६९	वृतु	१५७२	व्यच	२५१	शच	२५७
लोचृ	१००६	वटि	१६११	वर्ण	१८५०	वाक्षि	१४६३	विश	६२६	वृधु	८७५	व्यध	३५९	शट	२८५
लोचृ	१५९५	वठ	२९८	वर्ध	१८७३	वाछि	१०१९	विष	६४२	वृधु	१५७५	व्यथ	३३२	शठ	२९७
लोट्	१९७०	वठि	१०९४	वर्ष	१४३५	वात	१८६१	विषु	६४६	वृश	८९२	व्यय	४४१	शठ	१७०८
लोडृ	११४०	वडि	१११०	वर्ह	१५१०	वाश्रृ	१४१३	विष्क	१५८२	वृष	१८०१	व्यय	१७३५	शठ	१७०६
लोष्ट	१०८५	वण	३१२	वल	४७४	वास	१९२६	विष्क	१८१३	वृषु	८९७	व्युष	८२१	शठ	१७०४
व.		वद	३४८	वल्क	१८१०	विचिर्	५५०	विष्लृ	६५०	वृहू	९१०	व्युष	८०८	शडि	१११४
वकि	९२२	वद	१५४४	वल्क	१५८१	विच्छ	१०२३	वी	११६	वॄ	२०५	व्येञ्	४०	शण	३२२
वकि	९१९	वदि	११८३	वल्ग	९७३	विच्छ	१६००	वीर	१८९८	वेञ्	२४	व्रज	२७३	शद्लृ	३४१
वक्ष	१४५७	वन	३७५	वल्भ	१२९७	विजिर्	५५२	वृक	८३९	वेणृ	११५२	व्रज	१६९५	शद्लृ	३४२
वखि	९४७	वन	३६६	वल्गु	१९६१	विजी	५५३	वृक्ष	१४७८	वञ्चु	९८९	व्रण	३१६	शप	३८७
वगि	९६२	वन	३७६	वल्ल	१३५८	विजी	५५४	वृङ्	२०३	वेथृ	११७२	व्रण	१७१५	शप	३८८
वघि	९७८	वनु	३६२	वल्ह	१५१३	विट	५६४	वृजी	८४६	वेद	१९३७	व्रश्चू	१०१०	शब्द	१८६६
वच	२५०	वनु	३७७	वश	४८५	विथृ	५७१	वृजी	८५१	वेपृ	१२४६	व्री	९५	शम	१७३२
वच	१५३३	वप	३८६	वष	४९७	विद	५८१	वृजी	१५७०	वेल	१९०९	व्रीङ्	९३	शमु	४११
वज	२७२	वभ्र	१३१९	वस्क्	९३८	विद	५८६	वृञ्	२०२	वेलृ	१३३१	व्रीड	११३४	शर्ब	१२८०
वञ्चु	९८९	वम	४२९	वस	५१०	विद	५८७	वृञ्	२०४	वेल्ल	१३५७	व्रुड	७२१	शर्व	१३९६
वञ्चु	१५९७	वय	४३४	वस	५२८	विद	१७६५	वृञ्	१५३०	वेवीङ्	११९	श.		शल	४६०
वट	२७८	वर	१७३६	वस	१७५६	विद्लृ	५७८	वृण	८५९	वेष्ट	१०८२	शक	२२९	शल	४७३
वट	२८९	वरण	१९४३	वसु	५०९	विध	५९१	वृतु	८६३	वेहृ	१५१६	शकि	९१८	शम्ब	१८८०
वट	१७०२	वर्च	१००७	वह	५३१	विल	६१०	वृतु	८६८	वै	२२	शक्लृ	२२५	शल्भ	१२९६

Digitization by eGangotri-South Center
CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शव ४७९
शर्व १३९६
शश ४८४
शष ४९३
शसि १४८४
शशु १४९७
शसु ५११
शाखृ ९५६
शाडृ ११२९
शान १२३३
शासु १४९१
शासु १४९४
शिक्ष १४७४
शिखि ९५७
शिघि ९८०
शिजि १०६७
शिञ् ८७
शिट ५६०
शिल ६१५
शिष ६३६
शिष १५५७

शिष्लृ ६४८
शीक १५८५
शीक १५८६
शीकृ ९२५
शीङ् १०६
शीभृ १२९३
शील १९०८
शील १३४६
शुच ६७०
शुचिर् ६६३
शुच्य १३०७
शुठ ७०५
शुठ १७८३
शुठि ११०३
शुठि १६१५
शुध ७५०
शुन ७५५
शुन्ध १२२१
शुन्ध १६४१
शुभ ७७३
शुभ ७७६

शुभ ७८१
शुम्भ १२८५
शुम्भ १२८६
शुल्क १८११
शुल्ब १८८१
शुष ८०४
शूर १८९७
शूरी १३२९
शूर्प १८७८
शूल १३४९
शूष १४३०
शृधु ८७६
शृधु ८७७
शृधु १५७४
शॄ २१२
शेलृ १३३८
शै २९
शो १७
शोणृ ११४८
शौटृ १०९०
श्चुतिर् ७३१

श्मील १३४१
श्यैङ् ५४
श्रकि ९१६
श्रगि ९६५
श्रण ३२०
श्रण १७१२
श्रथ १७१९
श्रथ १७१७
श्रथ १५३९
श्रथ ३३४
श्रथि ११६९
श्रन्थ ११६७
श्रन्थ ११६८
श्रन्थ १६३६
श्रमु ४१४
श्रम्भु १२८९
श्रा ४९
श्रिञ् ६७
श्रीञ् १०२
श्रिषु ६४१
श्रु १२८

श्रै ४५
श्रोणृ ११४९
श्लकि ९१७
श्लगि ९६६
श्लथ ३३५
श्लाखृ ९५७
श्लाघृ ९८४
श्लिष ६५१
श्लिष १७७३
श्लिषु ६४४
श्लोकृ ९३४
श्लोणृ ११५०
श्वकि ९२३
श्वच २५९
श्वचि ९९९
श्वठ १७०५
श्वठ १७०७
श्वभ्र १८९५
श्वर्त १८५८
श्वल ४७१
श्वल्क १८०९

श्वस ५२३
श्वि ६८
श्विता ५७०
श्विदि ११९०

ष.

षगे २४२
षघ २४८
षच २५५
षच २५६
षञ्ज १०३९
षट २८६
षट्ट १८३३
षण ३७२
षणु ३७०
षद १५४१
षद्लृ ३३९
षद्लृ ३४०
षप ३९३
षम ४२६
षम्ब १८७९
षर्ज १०५६

षर्ब १२८१
षर्व १३८९
षल ४५८
षस ५१२
षम ४२५
षस्ज १०७५
षस्ति ११५८
षह १५५३
षह ५३२
षह ५३३
षान्त्व १९११
षिच ५४८
षिञ् ८५
षिञ् ८६
षिट ५६१
षिध ५९०
षिधु ५९२
षिधू ५९३
षिम्भु १२८७
षिल ६१६
षिवु ६२०

षु १३१
षु १५२
षुर ७९०
षुञ् १५५
षुट्ट् १८४०
षुह ८३२
षू १७१
षूङ् १६२
षूङ् १६३
षूद १२०१
षूद १८६७
षृभु ८८६
षेवृ १४०२
षै २८
षो १८
ष्टक २२८
ष्टगे २४५
ष्टन ३७४
ष्टभि १२९०
ष्टम ४२७
ष्टिघ ५४७

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष्टिप	५९८	ष्मिङ्	७३	सूर्क्ष	१४६१	स्तोम	१८८८	स्फुल	७९७	हद	३४९	हूडृ	११३५	ह्लप	१७२९
ष्टिम	६०३	ष्वद	१५४३	सूर्क्ष्य	१३०९	स्त्यै	५७	स्फूर्जा	१०६३	हन	३८१	हृ	१८०	ह्लस	५११
ष्टीम	१३०१	ष्वद	३५२	सत्र	१८९९	स्थुड	७१७	स्यम	१७३३	हम्म	१३००	हृञ्	१९६	ह्लादी	१२००
ष्टुच	६६५	ष्वञ्ज	१०६९	सूत्र	१८९३	स्थूल	१९०७	स्मिट	१७६३	हय	४४२	ह्री	९४	ह्वल	४६६
ष्टुञ्	१२५	ष्वप	३८४	सृ	१८६	स्ट्रक्ष	४५५	स्मील	१३४२	हर्य	१३०८	ह्रीछ	१०२७	ह्वगे	२४३
ष्टुप	१७८९	ष्वस्क	९३७	सृ	१८७	स्पदि	११८६	स्मृ	१७७	हल	४६४	ह्रस	५१८	ह्मल	४६७
ष्टुभु	७७४	ष्विदा	५७६	सृज	८४८	स्पर्ध	१२३०	स्यन्दू	१२०२	हसे	५२२	हृष	८९४	ह्वृ	१७५
ष्टेपृ	१२४४	ष्विदा	५७२	सृज	८४९	स्पश	४८६	स्यमु	४२८	हाक्	१४	हृणीङ्	१९५९	ह्वृ	१७६
ष्टै	४६	ष्विदा	५८२	सृप्लृ	८८०	स्पश	१७५०	स्रकि	९१५	हाङ्	१५	हृषु	९००	ह्वेञ्	६६
ष्ट्यै	५८	स.		सेकृ	९३१	स्पृ	१७८	स्रम्भु	१२८८	हि	७७	हेठ	१०९८	ह्नुङ्	१४९
ष्ट्रक्ष	१४५५	सपर	१९४७	स्कन्दिर्	१२०३	स्पृश	८८८	स्रंसु	१४८१	हिक्क	९४२	हेठ	१०९९		
ष्ठल	४६३	सभाज	१८२९	स्कभि	१२९१	स्पृह	१८०३	स्रिवु	६२२	हिडि	१११९	हेड	११३८	◆◆◆	
ष्ठा	३८	संकेत	१८६२	स्कुञ्	१५६	स्फायी	१३१३	स्रेकृ	९३२	हिल	६१३	हेडृ	११३०		
ष्ठिवु	६१७	संभूयस्	१९७९	स्कुदि	११९१	स्फिट्ट	८३४	स्रु	१२७	हिवि	१३७०	हेषृ	१४४३		
ष्ठिवु	६१८	संवर	१९५०	स्खद	३५४	स्फुट	६८५	स्वन	३७३	हिसि	१४९६	ह्रेषृ	१४४४		
ष्णसु	५१६	सग्रांम	१८८६	स्खदिर्	३५६	स्फुट	६९३	स्वर	१७३७	हिसि	१६७५	होडृ	११३१		
ष्णा	६२	साघ	१२२५	स्खल	४६८	स्फुट	१७८०	स्वर्द	११९७	हु	१५०	होडृ	११३६		
ष्णिह	१७७५	साम	१८८४	स्तन	१७२७	स्फुटिर्	६८९	स्वाद	११९८	हुडि	११२१	ह्रस	५१८		
ष्णु	१३८	सार	१८९०	स्तृञ्	१७९	स्फुड	७१९	स्वृ	१७३	हुडि	११२२	ह्राद	११९९		
ष्णुसु	८२८	सूच	१८१८	स्तृञ्	२१०	स्फुडि	१६१८	ह.		हुर्च्छा	१०२०	ह्री	९४		
ष्णुह	८३६	सुख	१७७६	स्तृहु	९११	स्फुर	७८८	हट	२९३	हुल	८००	ह्रीछ	१०२७		
ष्णै	४७	सुख	१९३१	स्तेन	१८७६	स्फुर्छा	१०२१	हठ	३००	हुडृ	७०९	ह्लगे	२४४		

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः	धातुः	निरनुबन्धधातुः	धात्वर्थः	लृट्	लृङ्	लुट्	आशीर्लिङ्	लुङ्	लिट्	हेतुणिजन्तम्	सन्नन्तम्	यङन्तम्	भावकर्मणोः
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४

तिङन्तकोषः

(द्वितीय आर्धधातुकखण्डः)

पदनिर्णयः – अस्मिन् कोषे यस्य धातोः लृट्लकारप्रथमपुरुषैकवचनरूपस्यान्ते 'ति' इति प्रत्ययो दृश्यते, स धातुः परस्मैपदी। यस्य धातोः लृट्लकारप्रथमपुरुषैकवचनरूपस्यान्ते 'ते' इति प्रत्ययः दृश्यते, स धातुरात्मनेपदी। यस्य धातोः लृट्लकारस्य प्रथमपुरुषैकवचनरूपस्यान्ते 'ति' 'ते' इति प्रत्ययौ दृश्येते, स धातुरुभयपदी, इति कोषे लृट्लकारस्य रूपं दृष्ट्वा धातोः पदं निर्णयन्तु भवन्तः।

कदाचित् कस्यचिदुपसर्गस्य योगे पदं परिवर्तते, कदाचित् कस्मिंश्चिदर्थविशेषेऽपि पदं परिवर्तते, तत् सर्वं धातोरधस्तात् लिखितं वर्तते। तत् तत्र तत्र द्रष्टव्यम्।

भ्वादिगणादारभ्य क्र्यादिगणान्ता आकारान्ता, एजन्ताश्च धातवः

१.	डुदाञ् दाने १०९१	दा	देना, दान करना	दास्यति	अदास्यत्	दाता	देयात्	अदात्	ददौ	दापयति/ते	दित्सति	देदीयते	दीयते
				दास्यते	अदास्यत	दाता	दासीष्ट	अदित	ददे	दापयति/ते	दित्सते	देदीयते	दीयते

१. आङो दोऽनास्यविहरणे (१.३.२०) – आङ्पूर्वाद् ददातेरनास्यविहरणे वर्तमानादकर्त्रभिप्राये क्रियाफलेऽप्यात्मनेपदं भवति। विद्यामादत्ते शिष्यः। (शिष्य विद्या को ग्रहण करता है)।

१. आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः (वा. १.३.२०) – विपादिकां व्याददाति। कूलं व्याददाति। अनास्यविहरणे इति किम् ? आस्यविहरणे केवलं परस्मैपदं भवति। आस्यं व्याददाति (मुँह खोलता है।)

२.	दाण् दाने ९३०	दा	देना, दान करना	दास्यति	अदास्यत्	दाता	देयात्	अदात्	ददौ	दापयति/ते	दित्सति	देदीयते	दीयते

२. दाणश्च सा चेच्चतुर्थ्यर्थे (१.३.५५) 'दाण् दाने' परस्मैपदी। ततः सम्पूर्वात् तृतीयायुक्तादात्मनेपदं भवति, सा चेत् तृतीया चतुर्थ्यर्थे भवति। कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात् ?

२. अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया (वा.) – 'दाण् दाने' इत्यस्य धातोरशिष्टव्यवहारे प्रयोगे चतुर्थ्यर्थे तृतीया भवति। उपाध्यायेन सक्तून् संप्रयच्छते, स्वयं ह ओदनं भुङ्क्ते छात्रः। (छात्र स्वयं चावल खाता है और उपाध्याय को सत्तू देता है।)। दास्या संयच्छते कामुकः। कामुकः सन् दास्यै ददाति, इत्यर्थः।

३.	देङ् रक्षणे ९६२	दे-दा	रक्षा करना, पोषण करना	दास्यते	अदास्यत	दाता	दासीष्ट	अदित	दिग्ये	दापयति/ते	दित्सते	देदीयते	दीयते
४.	दो अवखण्डने ११४८	दो-दा	अवखण्डन करना, तोड़ना	दास्यति	अदास्यत्	दाता	देयात्	अदात्	ददौ	दापयति/ते	दित्सति	देदीयते	दीयते
५.	धेट् पाने ९०२	धे-धा	स्तनपान करना	धास्यति	अधास्यत्	धाता	धेयात्	अधात् अधासीत् अदधत्	दधौ	धापयते	धित्सति	देधीयते	धीयते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
६.	डुधाञ् धारणपोषणयो:	धा	धारण करना,	धास्यति	अधास्यत्	धाता	धेयात्	अधात्	दधौ	धापयति/ते	धित्सति	देधीयते	धीयते
	१०९२		पोषण करना	धास्यते	अधास्यत	धाता	धासीष्ट	अधित	दधे	धापयति/ते	धित्सते	देधीयते	धीयते
७.	मा माने १०६२	मा	नापना, तौलना, समाना	मास्यति	अमास्यत्	माता	मेयात्	अमासीत्	ममौ	मापयति/ते	मित्सति	मेमीयते	मीयते
८.	मेङ् प्रणिदाने ९६१	मे-मा	अदल बदल करना	मास्यते	अमास्यत	माता	मासीष्ट	अमास्त	ममे	मापयति/ते	मित्सते	मेमीयते	मीयते
९.	माङ् माने शब्दे च १०८८	मा	नापना, शब्द करना	मास्यते	अमास्यत	माता	मासीष्ट	अमास्त	ममे	मापयति/ते	मित्सते	मेमीयते	मीयते
१०.	माङ् माने ११४२	मा	नापना, तौलना, समाना	मास्यते	अमास्यत	माता	मासीष्ट	अमास्त	ममे	मापयति/ते	मित्सते	मेमीयते	मीयते
११.	गाङ् गतौ ९५०	गा	जाना	गास्यते	अगास्यत	गाता	गासीष्ट	अगास्त	जगे	गापयति/ते	जिगासते	जेगीयते	गीयते
१२.	गा स्तुतौ ११०६ अयं छान्दस:।	गा	प्रशंसा करना, स्तुति करना	गास्यति	अगास्यत्	गाता	गेयात्	अगात्	जगौ	गापयति/ते	जिगासति	जेगीयते	गीयते
१३.	गै शब्दे ९१७	गै-गा	गाना	गास्यति	अगास्यत्	गाता	गेयात्	अगासीत्	जगौ	गापयति/ते	जिगासति	जेगीयते	गीयते
१४.	ओहाक् त्यागे १०९०	हा	छोड़ना, त्यागना	हास्यति	अहास्यत्	हाता	हेयात्	अहासीत्	जहौ	हापयति/ते	जिहासति	जेहीयते	हीयते
१५.	ओहाङ् गतौ १०८९	हा	जाना, चलना	हास्यते	अहास्यत	हाता	हासीष्ट	अहास्त	जहे	हापयति/ते	जिहासते	जाहायते	हायते
१६.	पा पाने ९२५	पा	पीना, पान करना	पास्यति	अपास्यत्	पाता	पेयात्	अपात्	पपौ	पाययते	पिपासति	पेपीयते	पीयते
१७.	शो तनूकरणे ११४५	शो-शा	छीलना, पतला करना	शास्यति	अशास्यत्	शाता	शायात्	अशात् अशासीत्	शशौ	शाययति/ते	शिशासति	शाशायते	शायते
१८.	षो अन्तकर्मणि ११४७	षो-सा	समाप्त करना, पूरा करना	सास्यति	असास्यत्	साता	सेयात्	असात् असासीत्	ससौ	साययति/ते	सिषासति	सेषीयते	सीयते
१९.	छो छेदने ११४६	छो-छा	काटना, छेदन करना	छास्यति	अच्छास्यत्	छाता	छायात्	अच्छात् अच्छासीत्	चच्छौ	छाययति/ते	चिच्छासति	चाच्छायते	छायते
२०.	पै शोषणे ९२०	पै-पा	सुखाना	पास्यति	अपास्यत्	पाता	पेयात्	अपासीत्	पपौ	पाययति/ते	पिपासति	पेपीयते	पीयते
२१.	पा रक्षणे १०५६	पा	रक्षा करना, पालन करना	पास्यति	अपास्यत्	पाता	पायात्	अपासीत्	पपौ	पालयति/ते	पिपासति	पापायते	पायते

२१. लुगागमस्तस्य तु वक्तव्य: (वा. ७.३.३७) – पातेर्लुगागमो णौ। पालयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
२२.	ओवै शोषणे ९२१	वै-वा	सुखाना, सूखना	वास्यति	अवास्यत्	वाता	वायात्	अवासीत्	ववौ	वापयति/ते	विवासति	वावायते	वायते
२३.	वा गतिगन्धनयो: १०५०	वा	हवा का बहना, जाना	वास्यति	अवास्यत्	वाता	वायात्	अवासीत्	ववौ	वापयति/ते	विवासति	वावायते	वायते

२३. वो विधूनने जुक् (वा. ७.३.३८) - वा इत्यस्य विधूननेऽर्थे (हवा झलना, कँपाना) वर्तमानस्य जुगागमो भवति णौ परत:। पक्षेणोपवाजयति। अन्यत्र पुक् - आवापयति केशान्।

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
२४.	वेञ् तन्तुसन्ताने १००६	वे-वा	बुनना, आच्छादित करना, व्याप्त होना	वास्यति	अवास्यत्	वाता	ऊयात्	अवासीत्	उवाय ववौ	वाययति/ते	विवासति	वावायते	ऊयते
				वास्यते	अवास्यत	वाता	वासीष्ट	अवास्त	ऊये ऊवे/ववे	वाययते/ते	विवासते	वावायते	ऊयते
२५.	रै शब्दे ९०९	रै-रा	शब्द करना, आवाज करना	रास्यति	अरास्यत्	राता	रायात्	अरासीत्	ररौ	रापयति/ते	रिरासति	रारायते	रायते
२६.	खै खदने ९१२	खै-खा	स्थिर होना, हिंसा करना	खास्यति	अखास्यत्	खाता	खायात्	अखासीत्	चखौ	खापयति/ते	चिखासति	चाखायते	खायते
२७.	जै ९१४	जै-जा	क्षीण होना, अनित्य होना	जास्यति	अजास्यत्	जाता	जायात्	अजासीत्	जजौ	जापयति/ते	जिजासति	जाजायते	जायते
२८.	षै क्षये ९१५	सै-सा	क्षीण होना, अनित्य होना	सास्यति	असास्यत्	साता	सायात्	असासीत्	ससौ	सापयति/ते	सिषासति	सासायते	सायते
२९	शै पाके ९१८	शै-शा	पकाना, भोजन पकाना	शास्यति	अशास्यत्	शाता	शायात्	अशासीत्	शशौ	शापयति/ते	शिशासति	शाशायते	शायते
३०.	कै शब्दे ९१६	कै-का	आवाज करना, शब्द करना	कास्यति	अकास्यत्	काता	कायात्	अकासीत्	चकौ	कापयति/ते	चिकासति	चाकायते	कायते
३१.	दैप् शोधने ९२४	दै-दा	साफ करना, धोना, शुद्ध करना	दास्यति	अदास्यत्	दाता	दायात्	अदासीत्	ददौ	दापयति/ते	दिदासति	दादायते	दायते
३२.	दाप् लवने १०५९	दा	हँसिये आदि से काटना	दास्यति	अदास्यत्	दाता	दायात्	अदासीत्	ददौ	दापयति/ते	दिदासति	दादायते	दायते
३३.	या प्रापणे १०४९	या	जाना, पहुँचना	यास्यति	अयास्यत्	याता	यायात्	अयासीत्	ययौ	यापयति/ते	यियासति	यायायते	यायते
३४.	भा दीप्तौ १०५१	भा	शोभा देना, चमकना	भास्यति	अभास्यत्	भाता	भायात्	अभासीत्	बभौ	भापयति/ते	बिभासति	बाभायते	भायते
३५.	ला आदाने १०५८	ला	लेना, ग्रहण करना	लास्यति	अलास्यत्	लाता	लायात्	अलासीत्	ललौ	लापयति/ते	लिलासति	लालायते	लायते

दाने इति चन्द्र: ३५. लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने (७.३.३९) - ली, ला इत्येतयोरङ्गयोरन्यतरस्यां नुक् लुक् इत्येतावागमौ भवत:, णौ परत: स्नेहविपातनेऽर्थे (=पिघलाना)। ला=ला आदाने, अथ च विभाषा लीयते: इति कृतात्त्वो ला इत्यपि, एतयोर्लुगागमो भवति। घृतं विलालयति, घृतं विलापयति।

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
३६.	रा दाने १०५७	रा	देना, दान करना	रास्यति	अरास्यत्	राता	रायात्	अरासीत्	ररौ	रापयति/ते	रिरासति	रारायते	रायते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रम:	धातु:	निरनुबन्धधातु:	धात्वर्थ:	लृट्	लृङ्	लुट्	आशीर्लिङ्	लुङ्	लिट्	हेतुणिजन्तम्	सन्नन्तम्	यङन्तम्	भावकर्मणो:
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४
३७.	दरिद्रा दुर्गतौ १०७३	दरिद्रा	दरिद्र होना, दु:खी होना	दरिद्रिष्यति	अदरिद्रिष्यत्	दरिद्रिता	दरिद्र्यात्	अदरिद्रासीत्	ददरिद्रौ दरिद्राञ्चकार दरिद्राम्बभूव, दरिद्रामास	दरिद्रापयति/ते	दिदरिद्रिषति दिदरिद्रासति	x	दरिद्रायते
३८.	ष्ठा गतिनिवृत्तौ ९२८	स्था	ठहरना, रुकना, स्थित होना	स्थास्यति	अस्थास्यत्	स्थाता	स्थेयात्	अस्थात्	तस्थौ	स्थापयति/ते	तिष्ठासति	तेष्ठीयते	स्थीयते

२१५.	जॄष् ११३०	जॄ	जीर्ण होना, वृद्ध होना	जरिष्यति जरीष्यति	अजरिष्यत् अजरीष्यत्	जरिता जरीता	जीर्यात्	अजरत् अजारीत्	जजार	जरयति/ते	जिजीर्षति जिजरिषति जिजरीषति	जेजीर्यते	जीर्यते

जनी जॄष् क्नसु रञ्जोऽमन्ताश्च (गणसूत्रम्) – जनी जॄष्, क्नसु, रञ्ज् अमन्ताश्च धातवो मितो भवन्ति। तेन 'मितां ह्रस्व:' इति णौ ह्रस्व:। जरयति।

२१६.	जॄ वयोहानौ १४९४	जॄ	जीर्ण होना, वृद्ध होना	जरिष्यति जरीष्यति	अजरिष्यत् अजरीष्यत्	जरिता जरीता	जीर्यात्	अजारीत्	जजार	जारयति/ते	जिजीर्षति जिजरिषति जिजरीषति	जेजीर्यते	जीर्यते
२१७.	झॄष् वयोहानौ ११३१	झॄ	जीर्ण होना, वृद्ध होना झड़ना	झरिष्यति झरीष्यति	अझरिष्यत् अझरीष्यत्	झरिता झरीता	झीर्यात्	अझारीत्	जझार	झारयति/ते	जिझीर्षति जिझरिषति जिझरीषति	जेझीर्यते	झीर्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
२१८.	कॄ विक्षेपे १४०९	कॄ	बिखेरना, फैलाना	करिष्यति करीष्यति	अकरिष्यत् अकरीष्यत्	करिता करीता	कीर्यात्	अकारीत्	चकार	कारयति/ते	चिकीर्षति चिकरिषति चिकरीषति	चेकीर्यते	कीर्यते
२१९.	गॄ निगरणे १४१०	गॄ	निगलना	गरिष्यति गरीष्यति	अगरिष्यत् अगरीष्यत्	गरिता गरीता	गीर्यात्	अगारीत्	जगार	गारयति/ते	जिगीर्षति जिगरिषति जिगरीषति, जिगलिषति	जेगिल्यते	गीर्यते

२१५. अवाद् ग्रः (१.३.५१) – गॄ निगरणे इति तौदादिकस्य ग्रहणम्, न तु गॄ शब्दे इति क्र्यादिपठितस्य। अवपूर्वाद् गिरतेरात्मनेपदं भवति। अवगिरते (निगलता है।)

२१५. समः प्रतिज्ञाने (१.३.५२) – सम्पूर्वाद् गिरतेः प्रतिज्ञाने वर्तमानादात्मनेपदं भवति। नित्यं शब्दं संगिरते (शब्द नित्य है, ऐसा स्वीकार करता है।) प्रतिज्ञाने इति किम् ? संगिरति ग्रासम्।

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
२२०.	नॄ नये १४९५ नॄ नये – अयं नयेऽर्थे मित्। नरयति। अन्यत्र नारयति।	नॄ	ले जाना	नरिष्यति नरीष्यति	अनरिष्यत् अनरीष्यत्	नरिता नरीता	नीर्यात्	अनारीत्	ननार	नरयति/ते	निनीर्षति निनरिषति निनरीषति	नेनीर्यते	नीर्यते
२२१.	कॄ हिंसायाम् १४९६	कॄ	दुःख देना, मार डालना	करिष्यति करीष्यति	अकरिष्यत् अकरीष्यत्	करिता करीता	कीर्यात्	अकारीत्	चकार	कारयति/ते	चिकीर्षति चिकरिषति चिकरीषति	चेकीर्यते	कीर्यते
२२२.	गॄ शब्दे १४९८	गॄ	शब्द करना, प्रशंसा करना	गरिष्यति गरीष्यति	अगरिष्यत् अगरीष्यत्	गरिता गरीता	गीर्यात्	अगारीत्	जगार	गारयति/ते	जिगीर्षति जिगरिषति जिगरीषति	x	गीर्यते
२२३.	ॠ गतौ १४९७	ॠ	जाना	अरिष्यति अरीष्यति	आरिष्यत् आरीष्यत्	अरिता अरीता	अर्यात्	आरीत्	अराञ्चकार अराम्बभूव, अरामास	आरयति/ते	ईर्षिषति अरिरिषति अरिरीषति	अरार्यते	ईर्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः	धातुः	निरनुबन्धधातुः	धात्वर्थः	लृट्	लृङ्	लुट्	आशीर्लिङ्	लुङ्	लिट्	हेतुणिजन्तम्	सन्नन्तम्	यङन्तम्	भावकर्मणि
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४

भ्वादिगणादारभ्य क्र्यादिगणान्ता अदुपधधातवः

क्रमः	धातुः	निरनुबन्धधातुः	धात्वर्थः	लृट्	लृङ्	लुट्	आशीर्लिङ्	लुङ्	लिट्	हेतुणिजन्तम्	सन्नन्तम्	यङन्तम्	भावकर्मणि
२२४.	अक कुटिलायां गतौ ७९२	अक्	कुटिल चलना, टेढ़ा चलना	अकिष्यति	आकिष्यत्	अकिता	अक्यात्	आकीत्	आक	अकयति/ते	अचिकिषति	x	अक्यते
२२५.	शक्लृ शक्तौ १२६१	शक्	कर सकना, समर्थ होना	शक्ष्यति	अशक्ष्यत्	शक्ता	शक्यात्	अशकत्	शशाक	शाकयति/ते	शिक्षति	शाशक्यते	शक्यते
२२६.	तक हसने ११७	तक्	हँसना	तकिष्यति	अतकिष्यत्	तकिता	तक्यात्	अतकीत्	तताक	ताकयति/ते	तितकिषति	तातक्यते	तक्यते
								अताकीत्					
२२७.	चक तृप्तौ ७८३	चक्	तृप्त होना	चकिष्यति	अचकिष्यत्	चकिता	चक्यात्	अचकीत्	चचाक	चकयति/ते	चिचकिषति	चाचक्यते	चक्यते
	चक इत्येष धातुः तृप्तावेव मित् भवति, न प्रतीघाते। तृप्तौ - चकयति। प्रतीघाते - चाकयति।							अचाकीत्					
२२८.	ष्टक प्रतिघाते ७८२	स्तक्	बदले में आघात करना	स्तकिष्यति	अस्तकिष्यत्	स्तकिता	स्तक्यात्	अस्तकीत्	तस्ताक	स्तकयति/ते	तिस्तकिषति	तास्तक्यते	स्तक्यते
								अस्ताकीत्					
२२९.	शक मर्षणे ११८७	शक्	कर ग्कना, समर्थ होना	शक्ष्यति	अशक्ष्यत्	शक्ता	शक्यात्	अशकत्	शशाक	शाकयति/ते	शिक्षति	शाशक्यते	शक्यते
			क्षमा करना	शक्ष्यते	अशक्ष्यत	शक्ता	शक्षीष्ट	अशक्त	शेके	शाकयति/ते	शिक्षते	शाशक्यते	शक्यते
	सेट्कोऽप्यमित्येके। तेषां मतेन--			शकिष्यति	अशकिष्यत्	शकिता	शक्यात्	अशकत्	शशाक	शाकयति/ते	शिशकिषति	शाशक्यते	शक्यते
				शकिष्यते	अशकिष्यत	शकिता	शकिषीष्ट	अशकिष्ट	शेके	शाकयति/ते	शिशकिषते	शाशक्यते	शक्यते
२३०.	चक तृप्तौ प्रतिघाते च ९३	चक्	तृप्त होना, रुकावट करना	चकिष्यते	अचकिष्यत	चकिता	चकिषीष्ट	अचकिष्ट	चेके	चाकयति/ते	चिचकिषते	चाचक्यते	चक्यते
२३१.	कक लौल्ये ९०	कक्	चपलता करना	ककिष्यते	अककिष्यत	ककिता	ककिषीष्ट	अककिष्ट	चकके	काकयति/ते	चिककिषते	चाकक्यते	कक्यते
२३२.	कखे हसने ७८४	कख्	हँसना	कखिष्यति	अकखिष्यत्	कखिता	कख्यात्	अकखीत्	चकाख	कखयति/ते	चिकखिषति	चाकख्यते	चख्यते
२३३.	कख हसने १२०	कख्	हँसना	कखिष्यति	अकखिष्यत्	कखिता	कख्यात्	अकखीत्	चकाख	काखयति/ते	चिकखिषति	चाकख्यते	चख्यते
								अकाखीत्					
२३४.	बख १३०	बख्	जाना	बखिष्यति	अबखिष्यत्	बखिता	बख्यात्	अबखीत्	बबाख	बाखयति/ते	बिबखिषति	बाबख्यते	बख्यते
								अबाखीत्					
२३५.	मख १३२	मख्	प्रज्वलित होना	मखिष्यति	अमखिष्यत्	मखिता	मख्यात्	अमखीत्	ममाख	माखयति/ते	मिमखिषति	मामख्यते	मख्यते
								अमाखीत्					

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
२३६.	णख १३४	नख्	अङ्कुरित होना	नखिष्यति	अनखिष्यत्	नखिता	नख्यात् .	अनखीत् अनाखीत्	ननाख	नाखयति/ते	निनखिषति	नानख्यते	नख्यते
२३७.	रख १३६	रख्	जाना	रखिष्यति	अरखिष्यत्	रखिता	रख्यात्	अरखीत् अराखीत्	रराख	राखयति/ते	रिरखिषति	रारख्यते	रख्यते
२३८.	लख गत्यर्थाः १३८	लख्	जाना	लखिष्यति	अलखिष्यत्	लखिता	लख्यात्	अलखीत् अलाखीत्	ललाख	लाखयति/ते	लिलखिषति	लालख्यते	लख्यते
२३९.	अग कुटिलायां गतौ ७९३	अग्	कुटिल चलना	अगिष्यति	आगिष्यत्	अगिता	अग्यात्	आगीत्	आग	अगयति/ते	अजिगिषति	×	अग्यते
२४०.	लगे सङ्गे ७८६	लग्	लगना, चिपकना, मिलना, संगत होना	लगिष्यति	अलगिष्यत्	लगिता	लग्यात्	अलगीत्	ललाग	लगयति/ते	लिलगिषति	लालग्यते	लग्यते
२४१.	रगे शङ्कायाम् ७८५	रग्	शङ्का करना	रगिष्यति	अरगिष्यत्	रगिता	रग्यात्	अरगीत्	रराग	रगयति/ते	रिरगिषति	रारग्यते	रग्यते
२४२.	षगे ७८९	सग्	ढाँकना, आच्छादित करना	सगिष्यति	असगिष्यत्	सगिता	सग्यात्	असगीत्	ससाग	सगयति/ते	सिसगिषति	सासग्यते	सग्यते
२४३.	ह्रगे ७८७	ह्रग्	ढाँकना, आच्छादित करना	ह्रगिष्यति	अह्रगिष्यत्	ह्रगिता	ह्रग्यात्	अह्रगीत्	जह्राग	ह्रगयति/ते	जिह्रगिषति	जाह्रग्यते	ह्रग्यते
२४४.	ह्लगे ७८८	ह्लग्	ढाँकना, आच्छादित करना	ह्लगिष्यति	अह्लगिष्यत्	ह्लगिता	ह्लग्यात्	अह्लगीत्	जह्लाग	ह्लगयति/ते	जिह्लगिषति	जाह्लग्यते	ह्लग्यते
२४५.	ष्टगे संवरणे ७९०	स्तग्	ढाँकना, आच्छादित करना	स्तगिष्यति	अस्तगिष्यत्	स्तगिता	स्तग्यात्	अस्तगीत्	तस्ताग	स्तगयति/ते	तिस्तगिषति	तास्तग्यते	स्तग्यते
२४६.	कगे नोच्यते ७९१	कग्	धातुरयमनेकार्थः।	कगिष्यति	अकगिष्यत्	कगिता	कग्यात्	अकगीत्	चकाग	कगयति/ते	चिकगिषति	चाकग्यते	कग्यते
२४७.	घघ हसने १५९	घघ्	हँसना	घघिष्यति	अघघिष्यत्	घघिता	घघ्यात्	अघाघीत् अघघीत्	जघाघ	घाघयति/ते	जिगघिषति	जाघघ्यते	घघ्यते
२४८.	षघ हिंसायाम् १२६८	सघ्	हिंसा करना, मारना	सघिष्यति	असघिष्यत्	सघिता	सघ्यात्	असघीत् असाघीत्	ससाघ	साघयति/ते	सिसघिषति	सासघ्यते	सघ्यते
२४९.	दघ घातने पालने च १२७३	दघ्	आघात करना, पालना	दघिष्यति	अदघिष्यत्	दघिता	दघ्यात्	अदघीत् अदाघीत्	ददाघ	दाघयति/ते	दिदघिषति	दादघ्यते	दघ्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
२५०.	वच परिभाषणे १०६३	वच्	बोलना, कहना	वक्ष्यति	अवक्ष्यत्	वक्ता	उच्यात्	अवोचत्	उवाच	वाचयति/ते	विवक्षति	वावच्यते	उच्यते
२५१.	व्यच व्याजीकरणे १२९३	व्यच्	छल करना, ठगना, फँसाना	विचिष्यति	अविचिष्यत्	विचिता	विच्यात्	अव्यचीत् अव्याचीत्	विव्याच	व्याचयति/ते	विव्यचिषति	वेविच्यते	विच्यते
२५२.	खच भूतप्रादुर्भावे १५३१	खच्	बाँधना, पुनर्जन्म होना	खचिष्यति	अखचिष्यत्	खचिता	खच्यात्	अखचीत् अखाचीत्	चखाच	खाचयति/ते	चिखचिषति	चाखच्यते	खच्यते
	खव् पूतिप्रादुर्भावे इति काशकृत्स्नः	खव्	दुर्गन्धयुक्त होना	खविष्यति	अखविष्यत्	खविता	खव्यात्	अखवीत् अखावीत्	चखाव	खावयति/ते	चिखविषति	चाखव्यते	खव्यते
२५३.	डुपचष् पाके ९९६	पच्	पकना, पकाना	पक्ष्यति	अपक्ष्यत्	पक्ता	पच्यात्	अपाक्षीत्	पपाच	पाचयति/ते	पिपक्षति	पापच्यते	पच्यते
				पक्ष्यते	अपक्ष्यत	पक्ता	पक्षीष्ट	अपक्त	पेचे	पाचयति/ते	पिपक्षते	पापच्यते	पच्यते
२५४.	त्वच संवरणे १३०१	त्वच्	आच्छादित करना, ढाँकना	त्वचिष्यति	अत्वचिष्यत्	त्वचिता	त्वच्यात्	अत्वचीत् अत्वाचीत्	तत्वाच	त्वाचयति/ते	तित्वचिषति	तात्वच्यते	त्वच्यते
२५५.	षच समवाये ९९७	सच्	इकट्ठा होनां	सचिष्यति	असचिष्यत्	सचिता	सच्यात्	असाचीत् असचीत्	ससाच	साचयति/ते	सिसचिषति	सासच्यते	सच्यते
				सचिष्यते	असचिष्यत	सचिता	सचिषीष्ट	असचिष्ट	सेचे	साचयति/ते	सिसचिषते	सासच्यते	सच्यते
२५६.	षच सेचने, सेवने च १६३	सच्	घिसना, रगड़ना, सेवा करना	सचिष्यते	असचिष्यत	सचिता	सचिषीष्ट	असचिष्ट	सेचे	साचयति/ते	सिसचिषते	सासच्यते	सच्यते
२५७	शच व्यक्तायां वाचि १६५	शच्	स्पष्ट बोलना	शचिष्यते	अशचिष्यत	शचिता	शचिषीष्ट	अशचिष्ट	शेचे	शाचयति/ते	शिशचिषते	शाशच्यते	शच्यते
२५८	मच कल्कने १७१ कथने इत्यन्ये	मच्	ऋण देना	मचिष्यते	अमचिष्यत	मचिता	मचिषीष्ट	अमचिष्ट	मेचे	माचयति/ते	ममचिषते	मामच्यते	मच्यते
२५९.	श्वच गतौ १६६	श्वच्	चलना	श्वचिष्यते	अश्वचिष्यत	श्वचिता	श्वचिषीष्ट	अश्वचिष्ट	शश्वचे	श्वाचयति/ते	शिश्वचिषते	शाश्वच्यते	श्वच्यते
२६०.	कच बन्धने १६८	कच्	बाँधना	कचिष्यते	अकचिष्यत	कचिता	कचिषीष्ट	अकचिष्ट	चकचे	काचयति/ते	चिकचिषते	चाकच्यते	कच्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
२६१.	अज गतिक्षेपणयोः २३०	अज्	जाना, टेढ़ा चलना,	वेष्यति	अवेष्यत्	वेता	वीयात्	अवैषीत्	विवाय	वाययति/ते	विवीषति	वेवीयते	वीयते
			फेंकना, स्थापित करना	अजिष्यति	आजिष्यत्	अजिता	x	आजीत्	x	x	अजिजिषति	x	x
२६२.	यज देवपूजासङ्गतिकरण-दानेषु १००२	यज्	देवपूजा करना, देना करना, धारण करना	यक्ष्यति	अयक्ष्यत्	यष्टा	इज्यात्	अयाक्षीत्	इयाज	याजयति/ते	यियक्षति	यायज्यते	इज्यते
				यक्ष्यते	अयक्ष्यत	यष्टा	यक्षीष्ट	अयष्ट	येजे	याजयति/ते	यियक्षते	यायज्यते	इज्यते
२६३.	भज सेवायाम् ९९८	भज्	सेवा करना, आश्रय लेना	भक्ष्यति	अभक्ष्यत्	भक्ता	भज्यात्	अभाक्षीत्	बभाज	भाजयति/ते	बिभक्षति	बाभज्यते	भज्यते
				भक्ष्यते	अभक्ष्यत	भक्ता	भक्षीष्ट	अभक्त	भेजे	भाजयति/ते	बिभक्षते	बाभज्यते	भज्यते
२६४.	त्यज हानौ ९८६	त्यज्	त्याग करना	त्यक्ष्यति	अत्यक्ष्यत्	त्यक्ता	त्यज्यात्	अत्याक्षीत्	तत्याज	त्याजयति/ते	तित्यक्षति	तात्यज्यते	त्यज्यते
२६५.	ओलजी व्रीडायाम् १२९०	लज्	लज्जित होना	लजिष्यते	अलजिष्यत	लजिता	लजिषीष्ट	अलजिष्ट	लेजे	लाजयति/ते	लिलजिषते	लालज्यते	लज्यते
२६६.	लज भर्जने २३८ भर्त्सयति इति काशकृत्स्नः	लज्	भूँजना निन्दा करना, गाली देना	लजिष्यति	अलजिष्यत्	लजिता	लज्यात्	अलजीत् अलाजीत्	ललाज	लाजयति/ते	लिलजिषति	लालज्यते	लज्यते
२६७.	जज युद्धे २४२	जज्	उपद्रव करना युद्ध करना	जजिष्यति	अजजिष्यत्	जजिता	जज्यात्	अजजीत् अजाजीत्	जजाज	जाजयति/ते	जिजजिषति	जाजज्यते	जज्यते
२६८.	ध्रज गतौ २१७	ध्रज्	जाना	ध्रजिष्यति	अध्रजिष्यत्	ध्रजिता	ध्रज्यात्	अध्रजीत् अध्राजीत्	दध्राज	ध्राजयति/ते	दिध्रजिषति	दाध्रज्यते	ध्रज्यते
२६९	ध्वज गतौ २२१	ध्वज्	जाना	ध्वजिष्यति	अध्वजिष्यत्	ध्वजिता	ध्वज्यात्	अध्वजीत् अध्वाजीत्	दध्वाज	ध्वाजयति/ते	दिध्वजिषति	दाध्वज्यते	ध्वज्यते
२७०.	खज मन्थे २३२	खज्	मथना	खजिष्यति	अखजिष्यत्	खजिता	खज्यात्	अखजीत् अखाजीत्	चखाज	खाजयति/ते	चिखजिषति	चाखज्यते	खज्यते
२७१.	गज शब्दे २४६ मदने च	गज्	रोना	गजिष्यति	अगजिष्यत्	गजिता	गज्यात्	अगजीत् अगाजीत्	जगाज	गाजयति/ते	जिगजिषति	जागज्यते	गज्यते
२७२.	वज गतौ २५२	वज्	जाना	वजिष्यति	अवजिष्यत्	वजिता	वज्यात्	अवजीत् अवाजीत्	ववाज	वाजयति/ते	विवजिषति	वावज्यते	वज्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
२७३.	व्रज २५३	व्रज्	जाना	व्रजिष्यति	अव्रजिष्यत्	व्रजिता	व्रज्यात्	अव्राजीत्	वव्राज	व्राजयति/ते	विव्रजिषति	वाव्रज्यते	व्रज्यते
२७४	अट गतौ २९५	अट्	घूमना, खेल खिलाना, भटकना	अटिष्यति	आटिष्यत्	अटिता	अट्यात्	आटीत्	आट	आटयति/ते	अटिटिषति	अटाट्यते	अट्यते
२७५.	घट चेष्टायाम् ७६३	घट्	घटित होना, उचित होना, सम्भव होना	घटिष्यते	अघटिष्यत	घटिता	घटिषीष्ट	अघटिष्ट	जघटे	घटयति/ते	जिघटिषते	जाघट्यते	घट्यते

कथं तर्हि 'कमलवनोद्घाटनं कुर्वति ये'। 'प्रविघाटयिता समुत्पतन् हरिदश्व: कमलाकरानिव' इत्यादि। अत्र समाधानम् - घट संघाते इति चौरादिकस्येदम्। न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयम्। नान्ये मितोऽहेतौ इति निषेधात्। अतो नवीनोऽयं धातु:।

२७६.	कटे वर्षावरणयो: २९४	कट्	बरसना, गिरना	कटिष्यति	अकटिष्यत्	कटिता	कट्यात्	अकटीत्	चकाट	काटयति/ते	चिकटिषति	चाकट्यते	कट्यते
२७७.	कटी गतौ ३२०	कट्	जाना	कटिष्यति	अकटिष्यत्	कटिता	कट्यात्	अकटीत् अकाटीत्	चकाट	काटयति/ते	चिकटिषति	चाकट्यते	कट्यते

केचित् इदितं मत्वा नुमि कृते कण्टित: कण्टितवान् इति वदन्ति।

केचिदत्र कटी इ इति प्रश्लिष्यन्ति। केचित् कटी ई इति।

२७८.	वट ७७९	वट्	स्पष्ट बोलना	वटिष्यति	अवटिष्यत्	वटिता	वट्यात्	अवटीत् अवाटीत्	ववाट	वटयति/ते	विवटिषति	वावट्यते	वट्यते
२७९.	भट परिभाषणे ७८० मित्	भट्	स्पष्ट बोलना	भटिष्यति	अभटिष्यत्	भटिता	भट्यात्	अभटीत् अभाटीत्	बभाट	भटयति/ते	बिभटिषति	बाभट्यते	भट्यते
२८०.	णट नृत्तौ नतावित्येके, गतावित्यन्ये ७८१	नट्	नाचना	नटिष्यति	अनटिष्यत्	नटिता	नट्यात्	अनटीत् अनाटीत्	ननाट	नटयति/ते नाटयति/ते	निनटिषति	नानट्यते	नट्यते

णट नृत्तौ, अयं घटादित्वात् मित्। मित्त्वात् 'मितां ह्रस्व:' इति ह्रस्व:। अस्य नृत्यं नृत्तं चार्थ:। यत्कारिषु नर्तकव्यपदेश:। पदार्थाभिनयो नृत्यम्। गात्रविक्षेपमात्रं नृत्तम्। अयं णोपदेश:। अपरो य: पठिष्यते 'णट नृत्तौ' इति तस्य नाट्यमर्थ:। स च मिन्न। नाटयति।

२८१	णट नृत्तौ ३१०	नट्	नाचना	नटिष्यति	अनटिष्यत्	नटिता	नट्यात्	अनटीत् अनाटीत्	ननाट	नाटयति/ते	निनटिषति	नानट्यते	नट्यते
२८२.	पट गतौ २९६	पट्	ढाँकना	पटिष्यति	अपटिष्यत्	पटिता	पट्यात्	अपटीत् अपाटीत्	पपाट	पाटयति/ते	पिपटिषति	पापट्यते	पट्यते

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
२८३.	रट परिभाषणे २९७	रट्	स्पष्ट बोलना, परिहास करना, निन्दा करना	रटिष्यति	अरटिष्यत्	रटिता	रट्यात्	अरटीत् अराटीत्	रराट	राटयति/ते	रिरटिषति	रारट्यते	रट्यते
२८४.	लट बाल्ये २९८	लट्	बालक्रीड़ा करना, तुतलाना	लटिष्यति	अलटिष्यत्	लटिता	लट्यात्	अलटीत् अलाटीत्	ललाट	लाटयति/ते	लिलटिषति	लालट्यते	लट्यते
२८५.	शट रुजाविशरण-गत्यवसादनेषु २९९ निवासे इति क्षीरतरंगिणी	शट्	छेदन करना, आच्छादित करना, जाना, दुःख देना	शटिष्यति	अशटिष्यत्	शटिता	शट्यात्	अशटीत् अशाटीत्	शशाट	शाटयति/ते	शिशटिषति	शाशट्यते	शट्यते
२८६.	षट अवयवे ३१३	सट्	चिपकना, समीप जाना	सटिष्यति	असटिष्यत्	सटिता	सट्यात्	असटीत् असाटीत्	ससाट	साटयति/ते	सिसटिषति	सासट्यते	सट्यते
२८७.	जट संघाते ३०५	जट्	चिपकना, एकजुट होना इकट्ठा होना	जटिष्यति	अजटिष्यत्	जटिता	जट्यात्	अजटीत् अजाटीत्	जजाट	जाटयति/ते	जिजटिषति	जाजट्यते	जट्यते
२८८.	तट उच्छ्राये ३०८	तट्	ऊँचा होना, उठना उन्नति करना	तटिष्यति	अतटिष्यत्	तटिता	तट्यात्	अतटीत् अताटीत्	तताट	ताटयति/ते	तितटिषति	तातट्यते	तट्यते
२८९.	वट वेष्टने ३००	वट्	लपेटना	वटिष्यति	अवटिष्यत्	वटिता	वट्यात्	अवटीत् अवाटीत्	ववाट	वाटयति/ते	विवटिषति	वावट्यते	वट्यते
२८९.	झट संघाते ३०६	झट्	चिपकना, एकजुट होना इकट्ठा होना	झटिष्यति	अझटिष्यत्	झटिता	झट्यात्	अझटीत् अझाटीत्	जझाट	झाटयति/ते	जिझटिषति	जाझट्यते	झट्यते
२९०.	भट भृतौ ३०७	भट्	मजदूरी करना, वेतन पर काम करना	भटिष्यति	अभटिष्यत्	भटिता	भट्यात्	अभटीत् अभाटीत्	बभाट	भाटयति/ते	बिभटिषति	बाभट्यते	भट्यते
२९२	खट काङ्क्षायाम् ३०९	खट्	इच्छा करना	खटिष्यति	अखटिष्यत्	खटिता	खट्यात्	अखटीत् अखाटीत्	चखाट	खाटयति/ते	चिखटिषति	चाखट्यते	खट्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
२९३	हट दीप्तौ ३१२	हट्	प्रकाशित होना	हटिष्यति	अहटिष्यत्	हटिता	हट्यात्	अहटीत् अहाटीत्	जहाट	हाटयति/ते	जिहटिषति	जाहट्यते	हट्यते
२९४.	पठ व्यक्तायां वाचि ३३०	पठ्	स्पष्ट बोलना, अध्ययन करना	पठिष्यति	अपठिष्यत्	पठिता	पठ्यात्	अपठीत् अपाठीत्	पपाठ	पाठयति/ते	पिपठिषति	पापठ्यते	पठ्यते
२९५.	मठ मदनिवासयो: ३३२	मठ्	निवास करना	मठिष्यति	अमठिष्यत्	मठिता	मठ्यात्	अमठीत् अमाठीत्	ममाठ	माठयति/ते	मिमठिषति	मामठ्यते	मठ्यते
२९६.	रठ परिभाषणे ३३४ रट इत्यन्ये	रठ्	रटना, स्पष्ट बोलना	रठिष्यति	अरठिष्यत्	रठिता	रठ्यात्	अरठीत् अराठीत्	रराठ	राठयति/ते	रिरठिषति	रारठ्यते	रठ्यते
२९७.	शठ कैतवे च ३४०	शठ्	धूर्तता करना, जुआ खेलना स्पर्धा करना	शठिष्यति	अशठिष्यत्	शठिता	शठ्यात्	अशठीत् अशाठीत्	शशाठ	शाठयति/ते	शिशठिषति	शाशठ्यते	शठ्यते
२९८.	वठ स्थौल्ये ३३१	वठ्	मोटा होना, बढ़ना	वठिष्यति	अवठिष्यत्	वठिता	वठ्यात्	अवठीत् अवाठीत्	ववाठ	वाठयति/ते	विवठिषति	वावठ्यते	वठ्यते
२९९.	कठ कृच्छ्रजीवने ३३३	कठ्	कष्ट पाना कठिनाई सहना	कठिष्यति	अकठिष्यत्	कठिता	कठ्यात्	अकठीत् अकाठीत्	चकाठ	काठयति/ते	चिकठिषति	चाकठ्यते	कठ्यते
३००.	हठ प्लुतिशठत्वयो:, ३३५ बलात्कार इत्यन्ये	हठ्	बलपूर्वक करना, कूदना शठता करना	हठिष्यति	अहठिष्यत्	हठिता	हठ्यात्	अहठीत् अहाठीत्	जहाठ	हाठयति/ते	जिहठिषति	जाहठ्यते	हठ्यते
३०१.	अड उद्यमे ३५८	अड्	उद्योग करना	अडिष्यति	आडिष्यत्	अडिता	अड्यात्	आडीत्	आड	आडयति/ते	अडिडिषति	x	अड्यते
३०२.	लड विलासे ३५९ लल इत्येके	लड्	सन्तुष्ट होना, प्रसन्न करना	लडिष्यति	अलडिष्यत्	लडिता	लड्यात्	अलडीत् अलाडीत्	ललाड	लाडयति/ते लडयति/ते	लिलडिषति	लालड्यते	लड्यते

लडि: जिह्वोन्मथने – लड विलासे इत्यस्यैवानुवादो मित्त्वार्थम्। जिह्वया उन्मथनम्=क्षोभणम्, इति षष्ठीतत्पुरुष:। लडयति जिह्वाम्। रसानां रसान् ज्ञापयति, इत्यर्थ:। जिह्वया उन्मथनम् इति तृतीयातत्पुरुषो वा – लडयति जिह्वया। देवदत्तो रसान् जानाति, तज्जिह्वया ज्ञापयति, इत्यर्थ:। शब्दप्रयोगादिजिह्वाव्यापार:। समाहारद्वन्द्वो वा – जिह्वा च उन्मथनं च जिह्वोन्मथने। जिह्वाशब्देन तद्व्यापार: शब्दप्रयोगादिरूपो लक्ष्यते। लडयति शत्रून्। अपशब्दैर्गर्हति, इत्यर्थ:। उन्मथनं लोडनम् – लडयति दधि। विलोडयति, इत्यर्थ:। अन्यत्र अमित्। लाडयति पुत्रम् (= पुत्र को लाड़ करता है अथवा खेल खिलाता है।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३०३	कड मदे ३६० कडि इत्येके	कड्	मत्त होना, गर्व करना	कडिष्यति	अकडिष्यत्	कडिता	कड्यात्	अकडीत् अकाडीत्	चकाड	काडयति/ते	चिकडिषति	चाकड्यते	कड्यते
३०४.	गड सेचने ७७७	गड्	घिसना	गडिष्यति	अगडिष्यत्	गडिता	गड्यात्	अगडीत् अगाडीत्	जगाड	गडयति/ते	जिगडिषति	जागड्यते	गड्यते
३०५.	कड मदे १३८०	कड्	गर्वित होना, अहंकारयुक्त होना	कडिष्यति	अकडिष्यत्	कडिता	कड्यात्	अकडीत् अकाडीत्	चकाड	काडयति/ते	चिकडिषति	चाकड्यते	कड्यते
३०६.	अण शब्दे ४४४	अण्	ध्वनि करना	अणिष्यति	आणिष्यत्	अणिता	अण्यात्	आणीत्	आण	आणयति/ते	अणिणिषति	x	अण्यते
३०७.	अण प्राणने ११७५ (अन इत्येके)	अण्	जीवित रहना, प्राणधारण करना	अणिष्यते	आणिष्यत	अणिता	अणिषीष्ट	आणिष्ट	आणे	आगयति/ते	अणिणिषते	x	अण्यते
३०८.	क्षणु हिंसायाम् १४६५	क्षण्	मार डालना, दुःख देना	क्षणिष्यति	अक्षणिष्यत्	क्षणिता	क्षण्यात्	अक्षणीत्	चक्षाण	क्षाणयति/ते	चिक्षणिषति	चङ्क्षण्यते	क्षण्यते
				क्षणिष्यते	अक्षणिष्यत	क्षणिता	क्षणिषीष्ट	अक्षणिष्ट अक्षत	चक्षणे	क्षाणयति/ते	चिक्षणिषते	चङ्क्षण्यते	क्षण्यते
३०९.	फण गतौ ८२१ मित्	फण्	आश्रय लेना	फणिष्यति	अफणिष्यत्	फणिता	फण्यात्	अफणीत् अफाणीत्	पफाण	फणयति/ते	पिफणिषति	पम्फण्यते	फण्यते
३१०.	रण ४४५	रण्	शब्द करना	रणिष्यति	अरणिष्यत्	रणिता	रण्यात्	अरणीत् अराणीत्	रराण	राणयति/ते	रिरणिषति	रंरण्यते	रण्यते
३११.	मण ४४८	मण्	कहना	मणिष्यति	अमणिष्यत्	मणिता	मण्यात्	अमणीत् अमाणीत्	ममाण	माणयति/ते	मिमणिषति	मम्मण्यते	मण्यते
३१२.	वण ४४६	वण्	भीड़ भाड़ होना, बोलना	वणिष्यति	अवणिष्यत्	वणिता	वण्यात्	अवणीत् अवाणीत्	ववाण	वाणयति/ते	विवणिषति	वंवण्यते	वण्यते
३१३.	भण ४४७	भण्	बोलना	भणिष्यति	अभणिष्यत्	भणिता	भण्यात्	अभणीत् अभाणीत्	बभाण	भाणयति/ते	बिभणिषति	बम्भण्यते	भण्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रम: १	धातु: २	निरनुबन्धधातु: ३	धात्वर्थ: ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणो: १४
३१४.	कण ४४९	कण्	शस्त्र से काटना	कणिष्यति	अकणिष्यत्	कणिता	कण्यात्	अकणीत् अकाणीत्	चकाण	काणयति/ते	चिकणिषति	चङ्कण्यते	कण्यते
३१५.	क्वण ४५०	क्वण्	झंकार करना	क्वणिष्यति	अक्वणिष्यत्	क्वणिता	क्वण्यात्	अक्वणीत् अक्वाणीत्	चक्वाण	क्वाणयति/ते	चिक्वणिषति	चङ्क्वण्यते	क्वण्यते
३१६.	व्रण ४५१	व्रण्	चोट करना, घाव करना मारना	व्रणिष्यति	अव्रणिष्यत्	व्रणिता	व्रण्यात्	अव्रणीत् अव्राणीत्	वव्राण	व्राणयति/ते	विव्रणिषति	वंव्रण्यते	व्रण्यते
३१७.	भ्रण ४५२	भ्रण्	चोट करना	भ्रणिष्यति	अभ्रणिष्यत्	भ्रणिता	भ्रण्यात्	अभ्रणीत् अभ्राणीत्	बभ्राण	भ्राणयति/ते	बिभ्रणिषति	बम्भ्रण्यते	भ्रण्यते
३१८.	ध्वण शब्दार्था: ४५३ (धण इत्यपि केचित्)	ध्वण्	ध्वनि करना, हल्ला मचाना, आवाज करना	ध्वणिष्यति	अध्वणिष्यत्	ध्वणिता	ध्वण्यात्	अध्वणीत् अध्वाणीत्	दध्वाण	ध्वाणयति/ते	दिध्वणिषति	दन्ध्वण्यते	ध्वण्यते
३१९.	कण गतौ ७९४	कण्	जाना, काटना	कणिष्यति	अकणिष्यत्	कणिता	कण्यात्	अकणीत् अकाणीत्	चकाण	कणयति/ते	चिकणिषति	चङ्कण्यते	कण्यते
३२०.	श्रण ७९८	श्रण्	जाना, देना	श्रणिष्यति	अश्रणिष्यत्	श्रणिता	श्रण्यात्	अश्रणीत् अश्राणीत्	शश्राण	श्रणयति/ते	शिश्रणिषति	शंश्रण्यते	श्रण्यते
३२१.	चण ७९६	चण्	जाना, चमकना	चणिष्यति	अचणिष्यत्	चणिता	चण्यात्	अचणीत् अचाणीत्	चचाण	चणयति/ते	चिचणिषति	चञ्चण्यते	चण्यते
३२२.	शण दाने च ७९७ शण गतावित्यन्ये	शण्	जाना, उपद्रव करना	शणिष्यति	अशणिष्यत्	शणिता	शण्यात्	अशणीत् अशाणीत्	शशाण	शणयति/ते	शिशणिषति	शंशण्यते	शण्यते
३२३.	रण गतौ ७९५	रण्	जाना, युद्ध करना	रणिष्यति	अरणिष्यत्	रणिता	रण्यात्	अरणीत् अराणीत्	रराण	रणयति/ते	रिरणिषति	रंरण्यते	रण्यते

दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि क्षपयश्चेति भोज: – भोजमते एते मित:। मित्त्वात् णौ ह्रस्वे – रणयति। अन्यमते – मित्त्वाभावात् – राणयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३२४.	पण व्यवहारे	पण्	क्रय विक्रय व्यवहार करना	पणिष्यते	अपणिष्यत	पणिता	पणिषीष्ट	अपणिष्ट	पेणे	पाणयति/ते	पिपणिषते	पम्पण्यते	पण्यते
	स्तुतौ च ४३९		मोल तोल करना, स्तुति करना	पणायिष्यति	अपणायिष्यत्	पणायिता	पणाय्यात्	अपणायीत्		पणाययति/ते	पिपणायिषति	x	पणाय्यते

लिट् - पणायाञ्चकार, पणायाम्बभूव, पणायामास

गुपूधूपविच्छिपणिपनिभ्य आयः / आयादय आर्धधातुके वा - गुपू, धूप, विच्छ, पण पन इत्येतेभ्य आयः प्रत्ययो भवति। स च आर्धधातुके वा।

पाणिनीयधातुपाठे पण व्यवहारे स्तुतौ च, पन च इति धातुद्वयं पृथक्कृत्यानन्तरं पठितम्। पृथक्कृत्य पाठात् 'पन' इत्यस्यार्थः स्तुतिरेव, न व्यवहारः। 'पण' इत्यस्यार्थः स्तुतिः व्यवहारश्च। 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यत्र पणिपनिसाहचर्यपाठात् पणेरपि स्तुतावेवायमायप्रत्ययः। पणायति=स्तौति। क्रेतव्यद्रव्यस्य मूल्यनिर्धारणाय प्रश्नप्रतिवचनात्मको व्यवहारः। तत्र नायं प्रत्ययः। पणते=व्यवहरति। उपदेशावस्थायामनुदात्तेतावुभौ। अतो यत्र व्यवहारार्थकात् पणधातोरायप्रत्ययो न भवति, तत आत्मनेपदं भवति। 'पणते पणेते पणन्ते' इति। अथ च यदा 'आयादय आर्धधातुके वा' इत्यायप्रत्ययो न भवति तदाप्यात्मनेपदं भवति। पेणे, पेने इति। यत्र आयप्रत्ययो भवति तत्रात्मनेपदं न भवति। पणायति, पनायति।

३२५.	अत सातत्यगमने ३८	अत्	लगातार बिना रुके चलना	अतिष्यति	आतिष्यत्	अतिता	अत्यात्	आतीत्	आत	आतयति/ते	अतितिषति	x	अत्यते
३२६	यती प्रयत्ने ३०	यत्	प्रयत्न या प्रयास करना	यतिष्यते	अयतिष्यत	यतिता	यतिषीष्ट	अयतिष्ट	येते	यातयति/ते	यियतिषते	यायत्यते	यत्यते
३२७.	चते याचने ८६५	चत्	याचना करना	चतिष्यति	अचतिष्यत्	चतिता	चत्यात्	अचतीत्	चचात	चातयति/ते	चिचतिषति	चाचत्यते	चत्यते
				चतिष्यते	अचतिष्यत	चतिता	चतिषीष्ट	अचतिष्ट	चेते	चातयति/ते	चिचतिषते	चाचत्यते	चत्यते .
३२८.	पत्लृ गतौ ८४५	पत्	गिरना, पड़ना, टपकना	पतिष्यति	अपतिष्यत्	पतिता	पत्यात्	अपप्तत्	पपात	पातयति/ते	पिपतिषति पित्सति	पनीपत्यते	पत्यते
३२९.	क्वथे निष्पाके ८४६	क्वथ्	उबालना	क्वथिष्यति	अक्वथिष्यत्	क्वथिता	क्वथ्यात्	अक्वथीत्	चक्वाथ	क्वाथयति/ते	चिक्वथिषति	चाक्वथ्यते	क्वथ्यते
३३०.	पथे गतौ ८४७	पथ्	मार्ग में चलना	पथिष्यति	अपथिष्यत्	पथिता	पथ्यात्	अपथीत्	पपाथ	पाथयति/ते	पिपथिषति	पापथ्यते	पथ्यते
३३१.	मथे विलोडने ८४८	मथ्	मथना	मथिष्यति	अमथिष्यत्	मथिता	अमथीत्	मथ्यात्	ममाथ	माथयति/ते	मिमथिषति	मामथ्यते	मथ्यते
३३२.	व्यथ भयसञ्चलनयोः ७६४	व्यथ्	व्यथित होना, डरना	व्यथिष्यते	अव्यथिष्यत	व्यथिता	व्यथिषीष्ट	अव्यथिष्ट	विव्यथे	व्यथयति/ते	विव्यथिषते	वाव्यथ्यते	व्यथ्यते
३३३.	प्रथ प्रख्याने ७६५	प्रथ्	प्रसिद्ध होना	प्रथिष्यते	अप्रथिष्यत	प्रथिता	प्रथिषीष्ट	अप्रथिष्ट	पिप्रथे	प्रथयति/ते	पिप्रथिषते	पाप्रथ्यते	प्रथ्यते
३३४.	श्रथ (श्नथ) ७९९	श्रथ्	मारना	श्रथिष्यति	अश्रथिष्यत्	श्रथिता	श्रथ्यात्	अश्रथीत् अश्राथीत्	शश्राथ	श्रथयति/ते	शिश्रथिषति	शाश्रथ्यते	श्रथ्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३३५.	श्लथ ८००	श्लथ्	मारना, शिथिल कर देना	श्लथिष्यति	अश्लथिष्यत्	श्लथिता	श्लथ्यात्	अश्लथीत् अश्लाथीत्	शश्लाथ	श्लथयति/ते	शिश्लथिषति	शाश्लथ्यते	श्लथ्यते
३३६	क्लथ हिंसार्थाः ८०२	क्लथ्	मारना, कूटना	क्लथयति	अक्लथिष्यत्	क्लथिता	क्लथ्यात्	अक्लथीत् अक्लाथीत्	चक्लाथ	क्लथयति/ते	चिक्लथिशति	चाक्लथ्यते	क्लथ्यते
३३७.	क्रथ ८०१	क्रथ्	मारना, मार डालना	क्रथिष्यति	अक्रथिष्यत्	क्रथिता	क्रथ्यात्	अक्रथीत् अक्राथीत्	चक्राथ	क्राथयति/ते	चिक्रथिषति	चाक्रथ्यते	क्रथ्यते

यद्यपि क्रथधातुर्मिदस्ति, तथापि 'जासिनिप्रहरणनाटक्रथपिषां हिंसायाम्' इति सूत्रनिर्देशाद् णिचि 'मितां ह्रस्वः' इति ह्रस्वो न भवति। क्राथयति।

३३८.	अद भक्षणे १०११	अद्	भक्षण करना, खाना	अत्स्यति	आत्स्यत्	अत्ता	अद्यात्	अघसत्	आद जघास	आदयति/ते	जिघत्सति	x	अद्यते

बहुलं छन्दसि - छन्दसि बहुलमदो घस्लृ आदेशो भवति। घस्तां नूनम्। आत्तामद्य मध्यतो मेद उद्धृतम्।

३३९.	षद्लृ विशरण-गत्यवसादनेषु ८५४	सद्	काटना, जाना, स्थित होना	सत्स्यति	असत्स्यत्	सत्ता	सद्यात्	असदत्	ससाद	सादयति/ते	सिषत्सति	सासद्यते	सद्यते
३४०.	षद्लृ विशरण-गत्यवसादनेषु १४२७	सद्	काटना, जाना, स्थित होना, दुःखी होना	सत्स्यति	असत्स्यत्	सत्ता	सद्यात्	असदत्	ससाद	सादयति/ते	सिषत्सति	सासद्यते	सद्यते

शदेः शितः (१-३-६०) - शद्लृ शातने परस्मैपदी। तस्मादात्मनेपदं भवति शिति। शीयते। अशिति तु परस्मैपदमेव - शशाद, शत्स्यति, शिशत्सति।

३४१	शद्लृ शातने ८५५	शद्	बैठना, उपविष्ट होना,	शत्स्यति	अशत्स्यत्	शत्ता	शद्यात्	अशदत्	शशाद	शातयति/ते अगतावर्थे- शादयति	शिशत्सति	शाशद्यते	शद्यते
३४२.	शद्लृ शातने १४२८	शद्	काटना, स्थित होना	शत्स्यति	अशत्स्यत्	शत्ता	शद्यात्	अशदत्	शशाद	शातयति/ते अगतावर्थे- शादयति	शिशत्सति	शाशद्यते	शद्यते
३४३.	मदी हर्षे १२०८	मद्	प्रसन्न होना, हर्षित होना	मदिष्यति	अमदिष्यत्	मदिता	मद्यात्	अमदत्	ममाद	मादयति/ते	मिमदिषति	मामद्यते	मद्यते

मदी हर्षग्लेपनयोः मित् - हर्षग्लेपनयोरर्थयोर्मदधातुर्मिद् भवति। तेन णौ 'मितां ह्रस्वः' इति ह्रस्वो भवति। मदयति। अन्येष्वर्थेषु मादयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३४४.	बद स्थैर्ये ५१	बद्	स्थिर होना, मजबूत होना	बदिष्यति	अबदिष्यत्	बदिता	बद्यात्	अबादीत् अबदीत्	बबाद	बादयति/ते	बिबदिषति	बाबद्यते	बद्यते
३४५.	रद विलेखने ५३	रद्	लिखना, कुरेदना	रदिष्यति	अरदिष्यत्	रदिता	रद्यात्	अरादीत् अरदीत्	रराद	रादयति/ते	रिरदिषति	रारद्यते	रद्यते
३४६.	णद अव्यक्ते शब्दे ५४	नद्	अव्यक्त कलकल ध्वनि करना	नदिष्यति	अनदिष्यत्	नदिता	नद्यात्	अनादीत् अनदीत्	ननाद	नादयति/ते	निनदिषति	नानद्यते	नद्यते
३४७.	खद स्थैर्ये हिंसायां च ५० चाद् भक्षणेऽपि	खद्	स्थिर होना, हिंसा करना	खदिष्यति	अखदिष्यत्	खदिता	खद्यात्	अखादीत् अखदीत्	चखाद	खादयति/ते	चिखदिषति	चाखद्यते	खद्यते
३४८.	वद व्यक्तायां वाचि १००९	वद्	स्पष्ट बोलना	वदिष्यति	अवदिष्यत्	वदिता	उद्यात्	अवादीत्	उवाद	वादयते	विवदिषति	वावद्यते	उद्यते

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (१.३.४७) – भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपदं भवति।

भासनम्	=	प्रकाशित होना	-	शास्त्रे वदते (शास्त्र उसकी बुद्धि में प्रकाशित होता है।)
उपसंभाषा	=	सान्त्वना देना	-	कर्मकरान् उपवदते।
ज्ञानम्	=	जानना	-	व्याकरणे वदते।
यत्नः	=	पुरुषार्थ करना	-	क्षेत्रे वदते/गेहे वदते।
विमतिः	=	विवाद करना	-	क्षेत्रे विवदन्ते/गेहे विवदन्ते।
उपमन्त्रणम्	=	सलाह करना	-	राजानम् उपवदते।

व्यक्तवाचां समुच्चारणे (१.३.४८) – व्यक्तवाचां सहोच्चारणे वदतेरात्मनेपदं भवति। सम्प्रवदन्ते ब्राह्मणाः (ब्राह्मण परस्पर मिलकर उच्चारण करते हैं।)

अनोरकर्मकात् (१.३.४९) – अनुपूर्वाद् वदतेरकर्मकाद् व्यक्तवाग्विषयादात्मनेपदं भवति। अनुवदते कठः कलापस्य (जैसे कलाप शाखाध्यायी बोलता है, वैसे ही उसके पीछे कठ शाखाध्यायी बोलता है।) **विभाषा विप्रलापे (१.३.५०)** – व्यक्तवाचां विप्रलापात्मके विरुद्धार्थके सहोच्चारणे वदतेरात्मनेपदं भवति। विप्रवदन्ते सांवत्सराः, विप्रवदन्ति सांवत्सराः (ज्योतिषी लोग परस्पर मिलकर विरुद्ध कथन करते हैं।)

अपाद्वदः (१.३.७३) – अपपूर्वाद् वदतेः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवति। धनकामो न्यायम् अपवदते (धन का लोभी न्याय छोड़कर बोलता है।) अकर्त्रभिप्राये क्रियाफले परस्मैपदमेव। अपवदति – झूठ बोलता है।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३४९.	हद पुरीषोत्सर्गे ९७७	हद्	मल त्यागना	हत्स्यते	अहत्स्यत	हत्ता	हत्सीष्ट	अहत्त	जहदे	हादयति/ते	जिहत्सते	जाहद्यते	हद्यते
३५०.	पद गतौ ११६९	पद्	जाना, होना, घटित होना	पत्स्यते	अपत्स्यत	पत्ता	पत्सीष्ट	अपादि	पेदे	पादयति/ते	पित्सते	पनीपद्यते	पद्यते
३५१.	दद दाने १७	दद्	दान देना	ददिष्यते	अददिष्यत	ददिता	ददिषीष्ट	अददिष्ट	दददे	दादयति/ते	दिददिषते	दादद्यते	दद्यते
३५२.	ष्वद आस्वादने १८	स्वद्	चाटना, स्वाद लेना, अच्छा लगना	स्वदिष्यते	अस्वदिष्यत	स्वदिता	स्वदिषीष्ट	अस्वदिष्ट	सस्वदे	स्वादयति/ते	सिस्वदिषते	सास्वद्यते	स्वद्यते
३५३.	म्रद मर्दने ७६७	म्रद्	मसलना	म्रदिष्यते	अम्रदिष्यत	म्रदिता	म्रदिषीष्ट	अम्रदिष्ट	मम्रदे	म्रदयति/ते	मिम्रदिषते	माम्रद्यते	म्रद्यते
३५४.	स्खद स्खदने ७६८	स्खद्	काटना, स्खलित होना	स्खदिष्यते	अस्खदिष्यत	स्खदिता	स्खदिषीष्ट	अस्खदिष्ट	चस्खदे	स्खदयति/ते	चिस्खदिषते	चास्खद्यते	स्खद्यते
३५५.	चदे याचने ८६६	चद्	माँगना, याचना करना	चदिष्यति	अचदिष्यत्	चदिता	चद्यात्	अचदीत्	चचाद	चादयति/ते	चिचदिषति	चाचद्यते	चद्यते
				चदिष्यते	अचदिष्यत	चदिता	चदिषीष्ट	अचदिष्ट	चेदे	चादयति/ते	चिचदिषते	चाचद्यते	चद्यते
३५६	स्खदिः स्खदने ८२० अवपरिभ्यां च	स्खद्	काटना, स्खलित होना	स्खदिष्यति	अस्खदिष्यत्	स्खदिता	स्खद्यात्	अस्खदत् अस्खादीत्,	चस्खाद अस्खदीत्	स्खदयति/ते	चिस्खदिषति	चास्खद्यते	स्खद्यते

स्खदिः अवपरिभ्यां च – अव परि इत्येताभ्यामुत्तरः स्खदिर्धातुर्मिन्न भवति। अवस्खादयति, परिस्खादयति। एतदन्यत्र मित् – स्खदयति।

३५७.	गद व्यक्तायां वाचि ५२	गद्	स्पष्ट बोलना	गदिष्यति	अगदिष्यत्	गदिता	गद्यात्	अगादीत् अगदीत्	जगाद	गादयति/ते	जिगदिषति	जागद्यते	गद्यते
३५८.	बध बन्धने ९७३	बध्	बाँधना	बीभत्सिष्यते	अबीभत्सिष्यत	बीभत्सिता	बीभत्सिषीष्ट	अबीभत्सिष्ट		बीभत्सयति/ते	बिबीभत्सिषति	x	बीभत्स्यते
									लिट् – बीभत्साञ्चक्रे, बीभत्साम्बभूव, बीभत्सामास				
				बाधयिष्यति	अबाधयिष्यत्	बाधयिता	बाध्यात्	अबीबधत्		बाधयति/ते	बिबाधयिषति	x	बाध्यते
								अबीबधत	लिट् – बाधयाञ्चक्रे, बाधयाम्बभूव, बाधयामास				

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य – मानेर्जिज्ञासायाम्, बधेर्वैरूप्ये, दानेरार्जवे, शानर्निशानेऽर्थे सन् प्रत्ययो भवति, अभ्यासस्य च दीर्घः। मान्, बध् इति अनुदात्तेतौ। अतः 'अनुदात्तङित आत्मनेपदम्' इत्यात्मनेपदम्। दान्, शान् इत्येतौ स्वरितेतौ। अतः 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति कर्त्रभिप्राये क्रियाफल आत्मनेपदम्। अकर्त्रभिप्राये क्रियाफले परस्मैपदम्। चौरादिका इमे। अतः सनोऽभावे स्वार्थिको णिच्। 'णिचश्च' इत्यनेन कर्त्रभिप्राये क्रियाफल आत्मनेपदम्। अकर्त्रभिप्राये क्रियाफले परस्मैपदम्। मानयति, मानयते। बाधयति, बाधयते। दानयति, दानयते। शानयति, शानयते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३५९.	व्यध ताडने ११८१	व्यध्	वेधन करना, पीडित करना	व्यत्स्यति	अव्यत्स्यत्	व्यद्धा	विध्यात्	अव्यात्सीत्	विव्याध	व्याधयति/ते	विव्यत्सति	वेविध्यते	विध्यते
३६०.	रध हिंसासंराद्ध्योः ११९३	रध्	मारना, भोजन पकाना	रत्स्यति	अरत्स्यत्	रद्धा	रध्यात्	अरधत्	ररन्ध	रन्धयति/ते	रिरत्सति	रारध्यते	रध्यते
				रधिष्यति	अरधिष्यत्	रधिता	रध्यात्	अरधत्	ररन्ध	रन्धयति/ते	रिरन्धिषति	रारध्यते	रध्यते
३६१.	दध धारणे ८	दध्	धारण करना	दधिष्यते	अदधिष्यत	दधिता	दधिषीष्ट	अदधिष्ट	देधे	दाधयति/ते	दिदधिषते	दादध्यते	दध्यते
३६२.	वनु याचने १४७०	वन्	याचना करना	वनिष्यते	अवनिष्यत	वनिता	वनिषीष्ट	अवनिष्ट अवत	ववने	वानयति/ते	विवनिषते	वंवन्यते	वन्यते
३६३.	मनु अवबोधने १४७१	मन्	मानना, समझना, जानना	मनिष्यते	अमनिष्यत	मनिता	मनिषीष्ट	अमनिष्ट अमत	मेने	मानयति/ते	मिमनिषते	मम्मन्यते	मन्यते
३६४.	मन ज्ञाने ११७६	मन्	मानना, समझना, अनुमान करना	मंस्यते	अमंस्यत	मन्ता	मंसीष्ट	अमंस्त	मेने	मानयति/ते	मिमंसते	मंमन्यते	मन्यते
३६५.	तनु विस्तारे १४६३	तन्	फैलाना, बढ़ना	तनिष्यति	अतनिष्यत्	तनिता	तन्यात्	अतनीत् अतानीत्	ततान	तानयति/ते	तितनिषति तितांसति तितंसति	तन्तन्यते	तन्यते तायते
				तनिष्यते	अतनिष्यत	तनिता	तनिषीष्ट	अतनिष्ट अतत	तेने	तानयति/ते	तितनिषते तितांसते तितंसते	तन्तन्यते	तन्यते तायते
३६६.	वन सम्भक्तौ ४६३	वन्	आवाज करना, शब्द करना	वनिष्यति	अवनिष्यत्	वनिता	वन्यात्	अवनीत् अवानीत्	ववान	वानयति/ते	विवनिषति	वंवन्यते	वन्यते
३६७.	जनी प्रादुर्भावे ११४९	जन्	उत्पन्न होना, पैदा होना	जनिष्यते	अजनिष्यत	जनिता	जनिषीष्ट	अजनिष्ट अजनि	जज्ञे	जनयति	जिजनिषते	जञ्जन्यते जाजायते	जन्यते जायते

जनी जॄष् क्नसु रञ्जोऽमन्ताश्च - जनी जॄष्, क्नसु, रञ्ज् अमन्ताश्च धातवो मितो भवन्ति। तेन 'मितां ह्रस्वः' इति णौ ह्रस्वः। जनयति।

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः (१.३.८६) - 'णिचश्च' इति कर्त्रभिप्राये क्रियाफल आत्मनेपदमुक्तम्। तदपवादोऽयम्। बुध्, युध्, नश्, जन्, इङ्, प्रु, द्रु, स्रु, इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। जन् + णिच् = जनयति (उत्पन्न कराता है)।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३६८.	जन जनने ११०५ अयं छान्दसः।	जन्	जन्म देना, उत्पन्न करना	जनिष्यति	अजनिष्यत्	जनिता	जन्यात् जायात्	अजानीत् अजनीत्	जजान	जानयति/ते	जिजनिषति	जञ्जन्यते जाजायते	जन्यते जायते
३६९.	खनु अवदारणे ८७८	खन्	खोदना	खनिष्यति	अखनिष्यत्	खनिता	खन्यात् खायात्	अखनीत् अखानीत्	चखान	खानयति/ते	चिखनिषति	चङ्खन्यते चाखायते	खन्यते खायते
				खनिष्यते	अखनिष्यत	खनिता	खनिषीष्ट	अखनिष्ट	चख्ने	खानयति/ते	चिखनिषते	चङ्खन्यते चाखायते	खन्यते खायते
३७०.	षणु दाने १४६४	सन्	देना, दान करना	सनिष्यति	असनिष्यत्	सनिता	सन्यात् सायात्	असनीत् असानीत्	ससान	सानयति/ते	सिसनिषति सिषासति	संसन्यते सासायते	सन्यते सायते
				सनिष्यते	असनिष्यत	सनिता	सनिषीष्ट	असनिष्ट असात	सेने	सानयति/ते	सिसनिषते सिषासते	संसन्यते सासायते	सन्यते सायते
३७१.	कनी दीप्तिकान्ति-गतिषु ४६०	कन्	चमकना, प्रकाशित होना, जाना	कनिष्यति	अकनिष्यत्	कनिता	कन्यात्	अकनीत् अकानीत्	चकान	कानयति/ते	चिकनिषति	चङ्कन्यते	कन्यते
३७२.	षण सम्भक्तौ ४६४	सन्	सम्यक् सेवा करना	सनिष्यति	असनिष्यत्	सनिता	सन्यात्	असनीत् असानीत्	ससान	सानयति/ते	सिसनिषति	संसन्यते	सन्यते
३७३.	स्वन शब्दे ८२७	स्वन्	आवाज करना, शब्द करना	स्वनिष्यति	अस्वनिष्यत्	स्वनिता	स्वन्यात्	अस्वनीत् अस्वानीत्	सस्वान	स्वनयति/ते	सिस्वनिषति	संस्वन्यते	स्वन्यते
	स्वन अवतंसने मित् - स्वनयति - अवतंसयति अलंकरोति वा। एतदन्यत्र अमित् - स्वानयति।												
३७४.	ष्टन ४६१	स्तन्	मेघ गरजना	स्तनिष्यति	अस्तनिष्यत्	स्तनिता	स्तन्यात्	अस्तनीत् अस्तानीत्	तस्तान	स्तानयति/ते	तिस्तनिषति	तंस्तन्यते	स्तन्यते
३७५.	वन शब्दे ४६२	वन्	आवाज करना, शब्द करना	वनिष्यति	अवनिष्यत्	वनिता	वन्यात्	अवनीत् अवानीत्	ववान	वानयति/ते	विवनिषति	वंवन्यते	वन्यते
३७६.	वन हिंसायाम् ८०३	वन्	हिंसा करना	वनिष्यति	अवनिष्यत्	वनिता	वन्यात्	अवनीत् अवानीत्	ववान	वनयति/ते	विवनिषति	वंवन्यते	वन्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३७७.	वनु च ८०३	वन्	हिंसा करना	वनिष्यति	अवनिष्यत्	वनिता	वन्यात्	अवनीत्	ववान	वनयति/ते	विवनिषति	वंवन्यते	वन्यते
								अवानीत्		वानयति/ते			

ग्ला, स्ना, वनु, वमां च – एते मितः। वनु च इति स्वतन्त्रोऽयं धातुः, न तु तानादिकस्यानुवादः। अनुपसर्गोऽयं वा मित्। तेन 'मितां ह्रस्वः' इति वा ह्रस्वः। वनयति, वानयति। सोपसर्गस्तु नित्यं मित्। प्रवनयति।

३७८.	ध्वन शब्दे ८२८	ध्वन्	आवाज करना, शब्द करना	ध्वनिष्यति	अध्वनिष्यत्	ध्वनिता	ध्वन्यात्	अध्वनीत्	दध्वान	ध्वनयति/ते	दिध्वनिषति	दंध्वन्यते	ध्वन्यते
								अध्वानीत्		ध्वानयति/ते			

ध्वनधातुः शब्देऽर्थे मिद् भवति। ध्वनयति घण्टाम्। शब्दायमानां करोति, इत्यर्थः। अन्येष्वर्थेषु अमित् – ध्वानयति, अस्पष्टाक्षरमुच्चारयति, इत्यर्थः।

३७९.	धन धान्ये ११०४	धन्	धान्य होना	धनिष्यति	अधनिष्यत्	धनिता	धन्यात्	अधानीत्	दधान	धानयति	दिधनिषति	दन्धन्यते	धन्यते
	अयं छान्दसः।							अधनीत्					
३८०.	घ्रण शब्दे, बण	घ्रण्	आवाज करना,	घ्रणिष्यति	अघ्रणिष्यत्	घ्रणिता	घ्रण्यात्	अघ्रणीत्	दघ्राण	घ्राणयति/ते	दिघ्रणिषति	दंघ्रण्यते	घ्रण्यते
	इत्यपि केचित् ४५९		शब्द करना। उपदेशे नान्तोऽयम्। तस्य फलं तु यङ्लुकि – दन्घ्नन्ति।					अघ्राणीत्					
३८१.	हन हिंसागत्योः १०१२	हन्	मारना, जाना,	हनिष्यति	अहनिष्यत्	हन्ता	वध्यात्	अवधीत्	जघान	घातयति/ते	जिघांसति	जेघ्नीयते	हन्यते
			चोट करना, कूटना							हिंसायां – जेघ्नीयते। गतावर्थे –		जङ्घन्यते	

आङो यमहनः (१.३.२८) – यम उपरमे, हन हिंसागत्योः, इत्येताभ्यामाङ्पूर्वाभ्यामकर्मकाभ्यामात्मनेपदं भवति। आयच्छते, आयच्छेते आयच्छन्ते। आहते आघ्नाते आघ्नते। अकर्मकादित्येव – आयच्छति कूपाद् रज्जुम्। आहन्ति खलं पादेन। स्वाङ्गकर्मकाच्चेति वक्तव्यम् – आयच्छते पाणिम्। आहते शिरः।

आत्मनेपदेष्वन्यतरस्याम् (२.४.४३) – लुङि परतो हनो वध इत्ययमादेशो वा भवति। आहत आहसाताम् आहसत। आवधिष्ट आवधिष्टाम् आवधिषत।

३८२.	पन स्तुतौ ४४०	पन्	स्तुति करना	पनिष्यते	अपनिष्यत	पनिता	पनिषीष्ट	अपनिष्ट	पेने	पानयति-ते	पिपनिषते	पम्पन्यते	पन्यते
				पनायिष्यति	अपनायिष्यत्	पनायिता	पनाय्यात्	अपनायीत्		पनाययति-ते	पिपनायिषति	x	पनाय्यते
									लिट्-पनायाञ्चकार, पनायाम्बभूव, पनायामास				

गुपूधूपविच्छिपणिपनिभ्य आयः / आयादय आर्धधातुके वा – गुपू, धूप, विच्छ, पण पन इत्येतेभ्य आयः प्रत्ययो भवति। स च आर्धधातुके वा। पाणिनीयधातुपाठे पण व्यवहारे स्तुतौ च, पन च इति धातुद्वयं पृथक्कृत्यानन्तरं पठितम्। पृथक्कृत्य पाठात् 'पन' इत्यस्यार्थः स्तुतिरेव, न व्यवहारः। 'पण' इत्यस्यार्थः स्तुतिः व्यवहारश्च। 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यत्र पणिपनिसाहचर्यपाठात् पणेरपि स्तुतावेवायमायप्रत्ययः। पणायति=स्तौति। पनायति=स्तौति। पनधातोः – आयप्रत्यये परस्मैपदं भवति। पणायति, पनायति। आयाभाव आत्मनेपदम्। पेने।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः	धातुः	निरनुबन्धधातुः	धात्वर्थः	लृट्	लृङ्	लुट्	आशीर्लिङ्	लुङ्	लिट्	हेतुणिजन्तम्	सन्नन्तम्	यङन्तम्	भावकर्मणोः
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४
३८३.	अन प्राणने १०७०	अन्	जीवित रहना, प्राणधारण करना	अनिष्यति	आनिष्यत्	अनिता	अन्यात्	आनीत्	आन	आनयति/ते	अनिनिषति	x	अन्यते
३८४.	ञिष्वप शये १०६८	स्वप्	सोना	स्वप्स्यति	अस्वप्स्यत्	स्वप्ता	सुप्यात्	अस्वाप्सीत्	सुष्वाप	स्वापयति/ते	सुषुप्सति	सोषुप्यते	सुप्यते
३८५.	तप सन्तापे ९८५	तप्	दुःखी होना, प्रकाशित होना	तप्स्यति	अतप्स्यत्	तप्ता	तप्यात्	अताप्सीत्	तताप	तापयति-ते	तितप्सति	तातप्यते	तप्यते
	उद्विभ्यां तपः (१.३.२७) - उद् वि इत्येवंपूर्वात् तपतेरकर्मकादात्मनेपदम्। उत्तपते (खूब गरम होता है।) वितपते (विशेष रूप से गरम होता है।)												
३८६.	डुवप बीजसन्ताने १००३	वप्	बीज बोना,	वप्स्यति	अवप्स्यत्	वप्ता	उप्यात्	अवाप्सीत्	उवाप	वापयति-ते	विवप्सति	वावप्यते	उप्यते
	छेदनेऽपि			वप्स्यते	अवप्स्यत	वप्ता	वप्सीष्ट	अवाप्त	ऊपे	वापयति-ते	विवप्सते	वावप्यते	उप्यते
३८७.	शप आक्रोशे १०००	शप्	निन्दा करना, शाप देना	शप्स्यति	अशप्स्यत्	शप्ता	शप्यात्	अशाप्सीत्	शशाप	शापयति-ते	शिशप्सति	शाशप्यते	शप्यते
				शप्स्यते	अशप्स्यत	शप्ता	शप्सीष्ट	अशप्त	शेपे	शापयति-ते	शिशप्सते	शाशप्यते	शप्यते
३८८.	शप आक्रोशे ११६८	शप्	आक्रोश करना,	शप्स्यति	अशप्स्यत्	शप्ता	शप्यात्	अशाप्सीत्	शशाप	शापयति/ते	शिशप्सति	शाशप्यते	शप्यते
			उलाहना देना	शप्स्यते	अशप्स्यत	शप्ता	शप्सीष्ट	अशप्त	शेपे	शापयति/ते	शिशप्सते	शाशप्यते	शप्यते
३८९.	तप दाहे ऐश्वर्ये वा ११५९	तप्	तपना, जलाना,	तप्स्यते	अतप्स्यत	तप्ता	तप्सीष्ट	अतप्त	तेपे	तापयति/ते	तितप्सते	तातप्यते	तप्यते
	ऐश्वर्येऽर्थे परस्मैपदमिति केचित्		ऐश्वर्यवान् होना	तप्स्यति	अतप्स्यत्	तप्ता	तप्यात्	अताप्सीत्	तताप	तापयति/ते	तितप्सति	तातप्यते	तप्यते
३९०.	क्रप कृपायां गतौ च ७७१	क्रप्	दया करना, जाना	क्रपिष्यते	अक्रपिष्यत	क्रपिता	क्रपिषीष्ट	अक्रपिष्ट	चक्रपे	क्रपयति/ते	चिक्रपिषते	चाक्रप्यते	क्रप्यते
३९१.	जप व्यक्तायां वाचि ३९७	जप्	जपना, स्पष्ट बोलना	जपिष्यति	अजपिष्यत्	जपिता	जप्यात्	अजापीत् अजपीत्	जजाप	जापयति/ते	जिजपिषति	जञ्जप्यते	जप्यते
३९२.	चप सान्त्वने ३९९	चप्	सान्त्वना देना	चपिष्यति	अचपिष्यत्	चपिता	चप्यात्	अचापीत् अचपीत्	चचाप	चापयति/ते	चिचपिषति	चाचप्यते	चप्यते
३९३.	षप समवाये ४००	सप्	इकट्ठा होना	सपिष्यति	असपिष्यत्	सपिता	सप्यात्	असापीत् असपीत्	ससाप	सापयति/ते	सिसपिषति	सासप्यते	सप्यते
३९४.	रप ४०१	रप्	स्पष्ट बोलना	रपिष्यति	अरपिष्यत्	रपिता	रप्यात्	अरापीत् अरपीत्	रराप	रापयति/ते	रिरपिषति	रारप्यते	रप्यते
३९५.	लप व्यक्तायां वाचि ४०२	लप्	बोलना, दुःख प्रकट करना	लपिष्यति	अलपिष्यत्	लपिता	लप्यात्	अलापीत् अलपीत्	ललाप	लापयति/ते	लिलपिषति	लालप्यते	लप्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
३९६.	त्रपूष् लज्जायाम् ३७४	त्रप्	लज्जित होना	त्रपिष्यते त्रप्स्यते	अत्रपिष्यत अत्रप्स्यत	त्रपिता त्रप्ता	त्रपिषीष्ट त्रप्सीष्ट	अत्रपिष्ट अत्रप्त	त्रेपे	त्रापयति/ते	तित्रपिषते तित्रप्सते	तात्रप्यते	त्रप्यते

दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि क्षपयश्चेति भोजः – भोजमते एते मितः। मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वे दलयति, वलयति, स्खलयति, रणयति, ध्वनयति, त्रपयति, क्षपयति। अन्यमते अमित्त्वात् दालयति, वालयति, स्खालयति, राणयति, ध्वानयति, त्रापयति, क्षापयति।

३९७.	रफ गतौ ४१३	रफ्	जाना	रफिष्यति	अरफिष्यत्	रफिता	रफ्यात्	अराफीत् अरफीत्	रराफ	राफयति/ते	रिरफिषति	रारफ्यते	रफ्यते
३९८.	कबृ वर्णे ३८०	कब्	शृङ्गार करना, रँगना	कबिष्यते	अकबिष्यत	कबिता	कबिषीष्ट	अकबिष्ट	चकबे	काबयति/ते	चिकबिषते	चाकब्यते	कब्यते
३९९.	रभ राभस्ये ९७४	रभ्	कार्य प्रारम्भ करना, हठात् करना	रप्स्यते	अरप्स्यत	रब्धा	रप्सीष्ट	अरब्ध	रेभे	रम्भयति/ते	रिप्सते	रारभ्यते	रभ्यते
४००.	डुलभष् प्राप्तौ ९७५	लभ्	प्राप्त करना	लप्स्यते	अलप्स्यत	लब्धा	लप्सीष्ट	अलब्ध	लेभे	लम्भयति/ते	लिप्सते	लालभ्यते	लभ्यते
४०१.	जभी गात्रविनामे ३८८	जभ्	जमुहाई लेना	जम्भिष्यते	अजम्भिष्यत	जम्भिता	जम्भिषीष्ट	अजम्भिष्ट	जजम्भे	जम्भयति/ते	जिजम्भिषते	जञ्जभ्यते	जभ्यते
४०२.	यभ मैथुने ९८०	यभ्	मैथुन करना	यप्स्यति	अयप्स्यत्	यब्धा	यभ्यात्	अयाप्सीत्	ययाभ	याभयति-ते	यियप्सति	यायभ्यते	यभ्यते
४०३.	णभ हिंसायाम् १२४०	नभ्	मारना, हिंसा करना	नभिष्यति	अनभिष्यत्	नभिता	नभ्यात्	अनभत्	ननाभ	नाभयति/ते	निनभिषति	नानभ्यते	नभ्यते
४०४.	णभ हिंसायाम् १५२०	नभ्	मार डालना, दुःख देना, हिंसा करना	नभिष्यति	अनभिष्यत्	नभिता	नभ्यात्	अनभीत् अनाभीत्	ननाभ	नाभयति/ते	निनभिषति	नानभ्यते	नभ्यते
४०५.	णभ हिंसायाम् अभावे च ७५२	नभ्	मारना	नभिष्यते	अनभिष्यत	नभिता	नभिषीष्ट	अनभत् अनभिष्ट	नेभे	नाभयति/ते	निनभिषते	नानभ्यते	नभ्यते
४०६.	गम्लृ गतौ ९८२	गम्	जाना	गमिष्यति	अगमिष्यत्	गन्ता	गम्यात्	अगमत्	जगाम	गमयति/ते	जिगमिषति	जङ्गम्यते	गम्यते

समो गम्यृच्छिभ्याम् (१.३.२९) – संपूर्वेभ्यो गमि, ऋच्छि, इत्येताभ्यामकर्मकाभ्यामात्मनेपदं भवति। सङ्गच्छते (साथ साथ चलता है।)

वा गमः (१.२.१५) – गमेर्धातोः परौ लिङ्सिचौ आत्मनेपदेषु झलादी वा कितौ भवतः। समगंस्त समगंसाताम् समगंसत। समगत समगसाताम् समगसत। सिचः अकित्त्वे – उपायंस्त उपायंसाताम् उपायंसत

जनी जॄष् क्नसु रञ्जोऽमन्ताश्च – जनी, जॄष्, क्नसु, रञ्ज् अमन्ताश्च धातवो मितो भवन्ति। तेन 'मितां ह्रस्वः' इति णौ ह्रस्वः। गमयति, रमयति, नमयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
४०७.	णम प्रह्वत्वे शब्दे च ९८१	नम्	झुकना, नमन करना	नंस्यति	अनंस्यत्	नन्ता	नम्यात्	अनंसीत्	ननाम	नमयति/ते	निनंसति	नंनम्यते	नम्यते

ज्वल, ह्वल, ह्मल, नमामनुपसर्गाद्वा – ज्वल, ह्वल, ह्मल, नम्, एतेऽनुपसर्गा वा मितः। तेन 'मितां ह्रस्वः' इति णौ वा ह्रस्वः। नमयति, नामयति। उपसर्गे नित्यं मित्त्वात् – परिणमयति। कथं तर्हि उन्नामयति ? उन्नामं करोति इति घञन्ताद् णौ एतद्।

४०८.	यम उपरमे ९८४	यम्	समाप्त करना, उपसंहार करना	यंस्यति	अयंस्यत्	यन्ता	यम्यात्	अयंसीत्	ययाम	यमयति/ते	यियंसति	यंयम्यते	यम्यते

यमोऽपरिवेषणे – यमधातुः अपरिवेषणे मित् भवति। अपरिवेषणे – आयामयति, द्राघयति इत्यर्थः। अतः परिवेषणे – यमयति ब्राह्मणान्, भोजयति इत्यर्थः। कथं तर्हि पर्यवसितं नियमयन् ? नियमवच्छब्दात् तत्करोति तदाचष्टे इति णौ बोध्यम्। विन्मतोर्लुक् इति वतिप्रत्ययस्य लुक्।

आङो यमहनः (१.३.२८) – यम उपरमे, हन हिंसागत्योः, इत्येताभ्यामाङ्पूर्वाभ्यामकर्मकाभ्यामात्मनेपदं भवति। आयच्छते, आहते।

उपाद्यमः स्वकरणे (१.३.५६) – उपपूर्वाद् यमः स्वकरणे वर्तमानादात्मनेपदं भवति। स्वकरणम् = पाणिग्रहणम्। कन्यामुपयच्छते (कन्या से विवाह करता है।)

समुदाङ्भ्यो यमोऽग्रन्थे (१.३.७५) – सम्, उद्, आङ् इत्येवंपूर्वाद् यमेः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवति, ग्रन्थविषयश्चेत्प्रयोगो न भवति। व्रीहीन् संयच्छते – (चावलों को इकट्ठा करता है।) भारम् उद्यच्छते – (भार को उठाता है।) वस्त्रम् आयच्छते – (वस्त्र को फैलाता है)। अकर्त्रभिप्राये क्रियाफले तु परस्मैपदमेव। संयच्छति, आयच्छति, उद्यच्छति। ग्रन्थविषये तु परस्मैपदमेव। उद्यच्छति चिकित्सां वैद्यः = वैद्य ग्रन्थ देखकर चिकित्सा करता है।

यमो गन्धने – (१.२.१५) – यमेर्धातोः गन्धनेऽर्थे (सूचन) वर्तमानात् सिच् प्रत्ययः किद् भवति, आत्मनेपदेषु परतः। लुङि सिचः कित्त्वे – उदायत उदायसाताम् उदायसत।

विभाषोपयमने – (१.२.१६) – यमेर्धातोः उपयमनेऽर्थे (विवाह करना) वर्तमानात् सिच् प्रत्ययः वा किद् भवति, आत्मनेपदेषु परतः। लुङि सिचः कित्त्वे – उपायत उपायसाताम् उपायसत।

४०९.	रमु क्रीडायाम् ८५३	रम्	खेलना, रमना	रंस्यते	अरंस्यत	रन्ता	रंसीष्ट	अरंस्त व्यरंसीत्	रेमे	रमयति/ते	रिरंसते	रंरम्यते	रम्यते

व्याङ्परिभ्यो रमः (१.३.८३) – वि, आङ्, परि इत्येवंपूर्वाद् रमेः परस्मैपदं भवति। विरमति (रुकता है।) आरमति (खेलता है।) परिरमति (चारों ओर खेलता है।)

उपाच्च (१.३.८४) – उपपूर्वाद् रमेः परस्मैपदं भवति। देवदत्तं उपरमति (देवदत्त को हटाता है।)

विभाषाऽकर्मकात् (१.३.८५) – उपपूर्वाद् रमतेरकर्मकाद् वा परस्मैपदं भवति। यावद्भुक्तमुपरमति, यावद्भुक्तमुपरमते।

४१०.	भ्रमु अनवस्थाने १२०५	भ्रम्	घूमना, भटकना	भ्रमिष्यति	अभ्रमिष्यत्	भ्रमिता	भ्रम्यात्	अभ्रमत्	बभ्राम	भ्रमयति/ते	बिभ्रमिषति	बम्भ्रम्यते	भ्रम्यते

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
४११.	शमु उपशमे १२०१	शम्	शान्त होना	शमिष्यति	अशमिष्यत्	शमिता	शम्यात्	अशमत्	शशाम	शमयति/ते	शिशमिषति	शंशम्यते	शम्यते

शमो दर्शने – दैवादिकः शम उपशमे धातुर्दर्शनेऽर्थे (दिखना) मित् न भवति। निशामयति रूपम्, पश्यति इत्यर्थः। उपशमे मित् – शमयति। चुरादिगणस्य 'शम आलोचने' नान्ये मितोऽहेतौ इति अमित्। अतस्तेन – शामयते। निशामय तदुत्पत्तिं विस्तराद् गदतो मम। धातूनामनेकार्थत्वात् श्रवणे वृत्तिः।

४१२.	तमु काङ्क्षायाम् १२०२	तम्	उत्कट इच्छा करना	तमिष्यति	अतमिष्यत्	तमिता	तम्यात्	अतमत्	तताम	तमयति/ते	तितमिषति	तन्तम्यते	तम्यते
४१३.	दमु उपशमे १२०३	दम्	दमन करना, दबाना	दमिष्यति	अदमिष्यत्	दमिता	दम्यात्	अदमत्	ददाम	दमयते	दिदमिषति	दन्दम्यते	दम्यते
४१४.	श्रमु तपसि खेदे च १२०४	श्रम्	थकना, खिन्न होना, श्रान्त होना	श्रमिष्यति	अश्रमिष्यत्	श्रमिता	श्रम्यात्	अश्रमत्	शश्राम	श्रमयति/ते	शिश्रमिषति	शंश्रम्यते	श्रम्यते

रजो विश्रामयन् राज्ञां धुर्यान् विश्रामयेति सः, इत्यत्र मितां ह्रस्वः इति व्यवस्थितविभाषाश्रयणात् ह्रस्वो न।

४१५.	क्षमू सहने १२०६	क्षम्	सहन करना, क्षमा करना	क्षमिष्यति क्षंस्यति	अक्षमिष्यत् अक्षंस्यत्	क्षमिता क्षन्ता	क्षम्यात्	अक्षमत्	चक्षाम	क्षमयति/ते	चिक्षमिषति चिक्षंसति	चङ्क्षम्यते	क्षम्यते
४१६.	क्लमु ग्लानौ १२०७	क्लम्	क्लान्त होना, थकना थकना, मुरझाना	क्लमिष्यति	अक्लमिष्यत्	क्लमिता	क्लम्यात्	अक्लमत्	चक्लाम	क्लमयति/ते	चिक्लमिषति	चङ्क्लम्यते	क्लम्यते
४१७.	भ्रमु चलने ८५०	भ्रम्	घूमना	भ्रमिष्यति	अभ्रमिष्यत्	भ्रमिता	भ्रम्यात्	अभ्रमीत्	बभ्राम	भ्रमयति/ते	बिभ्रमिषति	बम्भ्रम्यते	भ्रम्यते
४१८	क्षमूष् सहने ४४२	क्षम्	सहन करना, क्षमा करना	क्षमिष्यते क्षंस्यते	अक्षमिष्यत अक्षंस्यत	क्षमिता क्षन्ता	क्षमिषीष्ट क्षंसीष्ट	अक्षमिष्ट अक्षंस्त	चक्षमे	क्षमयति/ते	चिक्षमिषते चिक्षंसते	चङ्क्षम्यते	क्षम्यते
४१९.	कमु कान्तौ ४४३	कम्	इच्छा करना	कामयिष्यते	अकामयिष्यत	कामयिता	कामयिषीष्ट	अचीकमत		कामयति/ते	चिकामयिषते	x	काम्यते
				लिट्–कामयाञ्चक्रे, कामयाम्बभूव,कामयामास									
				कमिष्यते	अकमिष्यत	कमिता	कमिषीष्ट	अचकमत	चकमे	कामयति/ते	चिकमिषते	चङ्कम्यते	कम्यते

न कमि अमि चमाम् – अमन्ता इमे न मितः। अतो 'मितां ह्रस्वः' इति णिचि ह्रस्वो न। कामयति, आमयति, आचामयति।

४२०.	क्रमु पादविक्षेपे ४७३	क्रम्	पैरों से चलना, संक्रमण करना	क्रमिष्यति क्रमिष्यते	अक्रमिष्यत् अक्रमिष्यत	क्रमिता क्रमिता	क्रम्यात् क्रमिषीष्ट	अक्रमीत् अक्रमिष्ट	चक्राम चक्रमे	क्रमयति/ते क्रमयति/ते	चिक्रमिषति चिक्रमिषते	चङ्क्रम्यते चङ्क्रम्यते	क्रम्यते क्रम्यते

जनी जृष् क्नसु रञ्जोऽमन्ताश्च – जनी, जृष्, क्नसु, रञ्ज् अमन्ताश्च धातवो मितो भवन्ति। तेन 'मितां ह्रस्वः' इति णौ ह्रस्वः। क्रमयति। कथं पुनः संक्रामयति इति ? 'मितां ह्रस्वः' इत्यत्र 'वा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चित्तविरागे' इत्यस्माद् वा इति अनुवर्त्य व्यवस्थितविभाषाश्रयणात्।

वृत्तिसर्गतायनेषु क्रमः (१.३.३८) – वृत्तिरप्रतिबन्धः। सर्ग उत्साहः। तायनं स्फीतता। एष्वर्थेषु क्रमेरात्मनेपदं भवति। वृत्तिः – मन्त्रेषु अस्य क्रमते बुद्धिः (मन्त्रों में इसकी बुद्धि खूब चलती है।) सर्गः – व्याकरणाध्ययनाय क्रमते (व्याकरण पढ़ने में उत्साहित होता है।) तायनम् – अस्मिन् शास्त्राणि क्रमन्ते (इसमें शास्त्र समृद्ध होते हैं।)

उपपराभ्याम् (१.३.३९) – उपपरापूर्वात् क्रमतेर्वृत्त्यादिषु वर्तमानादात्मनेपदं भवति। उपक्रमते (प्रारम्भ करता है), पराक्रमते (पुरुषार्थ करता है।)

आङ उद्गमने (१.३.४०) – आङ् पूर्वात् क्रमतेरुद्गमने वर्तमानादात्मनेपदं भवति। आदित्य आक्रमते (सूर्य उदय होता है।)

वेः पादविहरणे (१.३.४१) – वि पूर्वात् क्रमतेः पादविहरणे वर्तमानादात्मनेपदं भवति। पादविहरणम् = पैर उठाना। विक्रमते वाजी (घोड़ा कदम उठाता है।)

प्रोपाभ्यां समर्थाभ्याम् (१.३.४२) – प्र उप एताभ्यां क्रमतेरात्मनेपदं भवति तौ चेत् प्रोपौ तुल्यार्थौ। भोक्तुं प्रक्रमते। भोक्तुमुपक्रमते (खाने को उद्यत होता है।)

अनुपसर्गाद्वा (१.३.४३) – अनुपसर्गात् क्रमतेरात्मनेपदं वा। क्रमते, क्रामति (चलता है।)

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
४२१.	छमु ४७०	छम्	खाना, भोजन करना	छमिष्यति	अच्छमिष्यत्	छमिता	छम्यात्	अच्छमीत्	चच्छाम	छमयति/ते	चिच्छमिषति	चञ्छम्यते	छम्यते
४२२.	झमु ४७२	झम्	खाना, भोजन करना	झमिष्यति	अझमिष्यत्	झमिता	झम्यात्	अझमीत्	जझाम	झमयति/ते	जिझमिषति	जञ्झम्यते	झम्यते
	जिमु इति केचित्	जिम्	खाना, भोजन करना, देना	जेमिष्यति	अजेमिष्यत्	जेमिता	जिम्यात्	अजेमीत्	जिजेम	जेमयति/ते	जिजेमिषति	जेजिम्यते	जिम्यते
४२३.	जमु अदने ४७१	जम्	निगलना	जमिष्यति	अजमिष्यत्	जमिता	जम्यात्	अजमीत्	जजाम	जमयति/ते	जिजमिणति	जञ्जम्यते	जम्यते
४२४.	आङः चमु अदने ४६९	चम्	खाना, भोजन करना	आचमिष्यति	आचमिष्यत्	आचम्यात्	आचमिता	आचमीत्	आचचाम	आचामयति	आचिचमिषति	आचञ्चम्यते	आचम्यते
	न कमि अमि चमाम् – अमन्ता अपि इमे न मितः। अतो 'मितां ह्रस्वः' इति णिचि ह्रस्वो न। कामयति, आमयति, आचामयति।									आचामयते			
४२५.	चमु भक्षणे १२७४	चम्	भोजन करना	चमिष्यति	चमिष्यत्	चमिता	चम्यात्	अचमीत्	चचाम	चामयति/ते	चिचमिषति	चञ्चम्यते	चम्यते
४२६.	षम ८२९	सम्	बाँटना, चुकता करना	समिष्यति	असमिष्यत्	समिता	सम्यात्	असमीत्	ससाम	समयति/ते	सिसमिषति	संसम्यते	सम्यते
४२७.	ष्टम अवैकल्ये ८३०	स्तम्	बाँटना, चुकता करना	स्तमिष्यति	अस्तमिष्यत्	स्तमिता	स्तम्यात्	अस्तमीत्	तस्ताम	स्तमयति/ते	तिस्तमिणति	तंस्तम्यते	स्तम्यते
,४२८.	स्यमु शब्दे ८२६	स्यम्	आवाज करना, ध्वनि करना	स्यमिष्यति	अस्यमिष्यत्	स्यमिता	स्यम्यात्	अस्यमीत्	सस्याम	स्यमयति/ते	सिस्यमिषति	सेसिम्यते	स्यम्यते
४२९.	टुवम उद्गिरणे ८४९	वम्	उगलना, वमन करना	वमिष्यति	अवमिष्यत्	वमिता	वम्यात्	अवमीत्	ववाम	वमयति/ते वामयति/ते	विवमिषति	वंवम्यते	वम्यते

ग्ला-स्ना-वनु-वमां च – अनुपसर्गादेषां मित्त्वं वा स्यात्। तेन मितां ह्रस्वः' इति ह्रस्वे वमयति वामयति। सोपसर्गात् नित्यं मित् – संवमयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

क्रमः १	धातुः २	निरनुबन्धधातुः ३	धात्वर्थः ४	लृट् ५	लृङ् ६	लुट् ७	आशीर्लिङ् ८	लुङ् ९	लिट् १०	हेतुणिजन्तम् ११	सन्नन्तम् १२	यङन्तम् १३	भावकर्मणोः १४
४३०.	द्रम गतौ ४६६	द्रम्	जाना, धारण पोषण करना	द्रमिष्यति	अद्रमिष्यत्	द्रमिता	द्रम्यात्	अद्रमीत्	दद्राम	द्रमयति/ते	दिद्रमिषति	दन्द्रम्यते	द्रम्यते
४३१.	अम गत्यादिषु ४६५	अम्	जाना	अमिष्यति	आमिष्यत्	अमिता	अम्यात्	आमीत्	आम	आमयति/ते	अमिमिषति	x	अम्यते
